MEGHA-DUTHA

KALIDASA.

मेघदूतम्

महाकवि कालिदास कृतम्

श्रीमल्लिनाथ सूरिविरचितया सञ्जीवनी
समाख्यायानुगतम्

श्रीयुक्तबाबुभुवनचन्द्रवसाकमहोदयस्य
प्रार्थनया
नवद्वीपनिवासि
श्रीअजितनाथन्यायरत्नेन
परिशोधितम्

कलिकातानगरे
श्रीयुतबाबुभुवनचन्द्रवसाकसंस्थापित संवादज्ञानरत्नाकराख्य
यन्त्रे तद्द्वारैव
१८२६ संवत्सरे
प्रकाशितम्।
[निमतला घाट ष्ट्रीट ८ संख्यक भवन।]

विज्ञापनम् ।

भारतेऽस्मिन् भारतीवरपुत्रतया प्रथितस्य कविकुलशिरोमणेः कालिदासस्य काव्यमलौकिककवित्वशक्तिश्च सर्व्वत्रोत्कृष्टतया प्रचरतीति सतां सुप्रसिद्धेरलमत्र तत्प्रतिपादनप्रयत्नेन । काव्यामृतपिपासूनां तृष्णातिशयमाकलय्येवानेनैव बहुकाव्यप्रपा निरमायि यत्रचाविश्य बहवोऽमृतरसं स्वादं स्वादं हृदयारविन्दमानन्दयन्तस्तृप्यन्ति ।

साम्प्रतमेतत्प्रणीतं मल्लिनाथविरचितटीकासहितं मेघदूतकाव्यमलमुद्रितं तच्च नानास्थानतः पुस्तकानि समाहृत्य विविच्य च यथाश्रममस्माभिः संस्कृतं यद्येतत् पाठकानां मुदमादधाति तदैव वयं श्रमसाफल्यं पश्येम । अत्र चेत्प्रमादतः केषाञ्चित् वर्णानां विपर्य्ययो न्यूनत्वं वा घटते तच्च परिशोध्य सकरुणनयनैरालोकनीयमिति ।

इदमपि सर्व्वान् विज्ञापयामः यद्यपि बहुषु स्थानेषु बहुतराणि संस्कृतपुस्तकानि मुद्रितानि तानि चानल्पमूल्यतया साधारणैः क्रेतुं न समर्थयन्ते इति विभाव्य कारुण्यरसपूरितान्तःकरणेन श्रीमता भुवनचन्द्रेण वसाकोपाधिना प्रत्येकं यथोचितमूल्यं निर्णीय बहुतर संस्कृत पुस्तकानि मुद्रितानि सन्ति चात्र विक्रयणार्थं मुद्रितेषु बहुषु केषाञ्चित् कस्यवा पुस्तकस्य प्रयोजनं स्यात् तदाऽत्र संवादज्ञानरत्नाकरे यन्त्रालये स्वयमागते पत्रिकायां प्रेरितायां वा स्वल्पमूल्येनैवप्राप्तव्यमिति, किमधिकेन ॥ इति शकाब्दाः १७८७ आषाढ़स्य द्वाविंशति दिने ।

नवद्वीपनिवासि

श्रीअजितनाथशर्म्मणः ॥

मेघदूतटीकासञ्जीवनी।

मङ्गलाचरणम्।

मातापितृभ्यां जगतो नमो वामार्द्धजानये।
सद्योदक्षिणदृक्पातसंकुचद्वामदृष्टये ॥ १ ॥
अन्तरायतिमिरोपशान्तये शान्तपावनमचिन्त्यवैभवम्।
तन्नरं वपुषि कुञ्जरं मुखे मन्महे किमपि तुन्दिलं महः ॥ २ ॥
शरणं करवाणि शर्म्मदं ते चरणं वाणि! चराचरोपजीव्यम्।
करुणामसृणैः कटाक्षपातैः कुरु मामम्ब! कृतार्थसार्थवाहम् ॥ ३ ॥

प्रतिज्ञा।

इहान्वयमुखेनैव सर्व्वं व्याख्यायते मया।
नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते ॥ ४ ॥
भारती कालिदासस्य दुर्व्याख्याविषमूर्च्छिता।
एषा सञ्जीवनी व्याख्या तामद्योज्जीवयिष्यति ॥ ५ ॥

मेघदूतम् ।

पूर्व्वमेघः ।

कश्चित् कान्ताविरहगुरुणा स्वाधिकारप्रमत्तः
शापेनास्तंगमितमहिमा वर्षभोग्येण भर्त्तुः ।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्य्याश्रमेषु ॥ १ ॥

आशीर्नमस्क्रियावस्तुनिर्द्देशो वापि तन्मुखमिति शास्त्रात् काव्यादौ वस्तुनिर्द्देशात् कथां प्रस्तौति । कश्चिदिति । स्वाधिकारात् स्वनियोगात् प्रमत्तोऽनवहितः । प्रमादोऽनवधानतेत्यमरः । जुगुप्साविरामप्रमादार्थानामुपसंख्यानमित्यपादानत्वात् पञ्चमी । अतएवापराधाद्धेतोः कान्ताविरहेण गुरुणा दुर्भरेण दुस्तरेणेत्यर्थः । गुरुस्तु गीष्पतौ श्रेष्ठे गुरौ पितरि दुर्भरे इति विश्वः । वर्षं संवत्सरं भोग्येन । कालाध्वनोरत्यन्तसंयोग इति द्वितीया । अत्यन्तसंयोगे चेति समासः । कुमति चेति णत्वम् ।

तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी
नीत्वा मासान् कनकवलयभ्रंशरिक्तप्रकोष्ठः।

भर्तुः स्वामिनः शापेन अस्तंगमितो महिमा सामर्थ्यं यस्य सोऽस्तंगमितमहिमा। अस्तमिति मकारान्तमव्ययं तस्य द्वितीयेतियोगविभागात्समासः। कश्चिदनिर्दिष्टनामा यक्षो देवयोनिविशेषः। विद्याधराप्सरोयक्षरक्षोगन्धर्व्वकिन्नराः। पिशाचोगुह्यकः सिद्धो भूतोऽमी देवयोनयइत्यमरः। जनकतनयायाः सीतायाः स्नानैरवगाहनैः पुण्यानि पवित्राणि उदकानि येषु तेषु पावनेष्वित्यर्थः। छायाप्रधानास्तरवः छायातरवः शाकपार्थिवादित्वात्समासः। स्निग्धाः सान्द्राः छायातरवो नमेरुवृक्षा येषु तेषु वसतियोग्येष्वित्यर्थः। स्निग्धन्तु मसृणे सान्द्रे इति छायावृक्षोनमेरुः स्यादिति च शब्दार्णवः। रामगिरेश्चित्रकूटस्य आश्रमेषु वसतिं चक्रे कृतवान्। अत्र नगनगरार्णवादिवर्णनासद्भावान्महाकाव्यत्वम्। रसो विप्रलम्भाख्यः शृङ्गारः तत्राप्युन्मादावस्था। अतएव एकत्रानवस्थानं सूचितम् आश्रमेष्विति बहुवचनेन। सीतां प्रति रामस्य हनूमत्सन्देशं मनसि निधाय मेघसन्देशं कविः कृतवानित्याहुः। अत्र काव्ये सर्व्वत्र मन्दाक्रान्ता वृत्तम्। मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद्गुरू चेदिति॥ २॥

आषाढ़स्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ॥ २ ॥

तस्मिन्निति। तस्मिन्नद्रौ चित्रकूटाख्ये अबला विप्रयुक्तः कान्ताविरही कनकस्य वलयः कटकम्। कटकं वलयोऽस्त्रियामित्यमरः। तस्य भ्रंशेन पातेन रिक्तः शून्यः प्रकोष्ठः कूर्परादधःप्रदेशो यस्य स तथोक्तः। कक्षान्तरे प्रकोष्ठः स्यात् प्रकोष्ठः कूर्परादध इति शाश्वतः। विरहदुःखात् कृश इत्यर्थः। कामी कामुकः स यक्षः कतिचिन्मासानष्टौ मासानित्यर्थः मासानन्यान् गमय चतुर इति वक्ष्यमाणत्वात्। नीत्वा यापयित्वा आषाढाभिर्नक्षत्रेण युक्ता पौर्णमासी आषाढी। नक्षत्रेण युक्तःकाल इत्यण्। टिड्ढाणञित्यादिना ङीप्। साऽषाढ्यस्मिन् पौर्णमासीत्याषाढो मासः। सास्मिन् पौर्णमासीति संज्ञायामित्यण्। तस्य प्रथमदिवसे आश्लिष्टसानुमाक्रान्ततटम्, वप्रक्रीडा उत्खातकेलयः। उत्खातकेलिः क्रीडादौ वप्रक्रीडा निगद्यत इति शब्दार्णवः। तासु परिणतस्तिर्य्यग्दन्तप्रहारः। तिर्यग्दन्तप्रहारस्तु गजः परिणतो मत इति हलायुधः। स चासौ गजश्च तमिव प्रेक्षणीयं दर्शनीयं मेघं ददर्श। गजप्रेक्षणीयमित्यत्र लुप्तोपमा। केचिदाषाढस्य प्रथमदिवस इत्यत्र प्रत्यासन्ने नभसीति, वक्ष्यमाणनभो

तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतो
रन्तर्वाष्पश्चिरमनुचरोराजराजस्य दध्यौ।

मास प्रत्यासत्त्यर्थं प्रथमदिवसइति पाठं कल्पयन्ति तदसङ्गतं प्रथमातिरेके कारणाभावात्। नभोमासस्य प्रत्यासत्त्यर्थमित्युक्तमिति चेन्न प्रत्यासत्तिमात्रस्य मासप्रत्यासत्त्यैव प्रथमदिवसस्याप्युपपत्तेः अत्यन्तप्रत्यासत्तेरुपयोगाभावेनाविवक्षितत्वात् विवक्षितत्वे वा स्वपक्षेपि प्रथमदिवसातिक्रमणे मेघदर्शनकल्पनायाम् प्रमाणाभावेन तदसम्भवात् प्रत्युतास्मत्पक्षे एव कुशलसन्देशस्य भाव्यनर्थप्रतीकारार्थस्य पुरतएवानुमानमुक्तं भवतीत्युपयोगसिद्धिः। ननून्मत्तस्य नायं विवेकइति चेन्न उन्मत्तस्य नानर्थस्य प्रतीकारार्थं प्रवृत्तिरपीति सन्देशएव माभूत् तथा च काव्यारम्भएवाप्रसिद्धः स्यादित्यहोमल्लोच्छेदी पाण्डित्यप्रकर्षः। कथं तर्हि शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणावित्यादिना भगवत्प्रबोधावधिकस्य शापस्य मासचतुष्टयावशिष्टस्योक्तिः दशदिवसाधिकत्वादिति चेत् स्वपक्षेपि कथं सा विंशतिदिवसैन्यूनत्वादिति सन्तोष्टव्यम्। तस्मादीषद्वैषम्यमविवक्षितमिति सुष्ठूक्तं प्रथमदिवसइति॥ २॥

तस्येति। राजानो यक्षाः। राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रिय शक्रयोरिति विश्वः। राज्ञो-

मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ॥ ३ ॥

राजा राजराजः कुवेरः। राजराजो धनाधिप इत्यमरः। राजाहःसखिभ्यष्टच् इति टच् प्रत्ययः। तस्यानुचरो यक्षः अन्तर्वाष्पो धीरोदात्तत्वादन्तः स्तम्भिताश्रुः सन् कौतुकाधानहेतोरभिलाषोत्पादकारणस्य। कौतुकञ्चाभिलाषे स्यादुत्सवे नर्म्महर्षयोरिति विश्वः। तस्य मेघस्याग्रे कथमपि गरीयसा प्रयत्नेनेत्यर्थः। ज्ञानहेतुविवक्षायामप्यादि कथमव्ययम्। कथमादि तथाप्यन्तं यत्नगौरववाढयोरित्युज्ज्वलः। स्थित्वा चिरं दध्यौ चिन्तयामास। ध्यै चिन्तायामितिधातोर्लिट्। मनोविकारोपशमनपर्य्यन्तमिति शेषः। विकारहेतुमाह तथाहि मेघालोके मेघदर्शने सति सुखिनोपि प्रियादिजनसङ्गतस्यापि चेतः चित्तम् अन्यथाभूता वृत्ति व्यापारो यस्य तदन्यथावृत्ति भवति विकृतिमापद्यत इत्यर्थः। कण्ठाश्लेषप्रणयिनि कण्ठालिङ्गनार्थिनि जने दूरे संस्था स्थितिर्यस्य तस्मिन् दूरसंस्थे सति किं पुनः विरहिणः किमुत वक्तव्यमित्यर्थः। विरहिणां मेघसन्दर्शनमुद्दीपनं भवतीति भावः। अर्थान्तरन्यासोऽलङ्कारः त

६ तं वंशे भुवनविदिते पुष्करावर्त्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः

दिष्टार्थोद्युक्तत्वात् । इष्टार्थोद्युक्त उत्सुक इत्यमरः । अ परिगणयन् अविचारयन् गुह्यको यक्षस्तं मेघं ययाचे याचितवान् प्रार्थयामास । तथाहि कामार्त्ताः मदनातुराश्चेतनाश्चाचेतनाश्च तेषु विषये प्रकृतिकृपणाः स्वभावदीनाः कामान्धानां युक्तायुक्तविवेकशून्यत्वादचेतनयाच्ञा न विरुध्यत इत्यर्थः । अत्र मेघसन्देशयोर्विरूपयोर्घटनाद्विषमालङ्कारः । तदुक्तं विरुद्धनार्य्यस्योत्पत्तिर्यत्रानर्थस्य वा भवेत् । विरूपघटना चासौ विषमालङ्कृतिस्त्रिधा । सा चार्थान्तरन्यासानुप्राणिता तत्समर्थकत्वेनैव चतुर्थपादे तस्योपन्यासात् ॥ ५ ॥

सम्प्रति याच्ञाप्रकारमाह जातमिति । हे मेघ! त्वां भुवनेषु विदिते भुवनविदिते । निष्ठेति भूतार्थे क्तः गतिबुद्धोत्यादिना वर्त्तमानार्थत्वेपि क्तस्य च वर्त्तमान इति भुवनशब्दस्य षष्ठ्यन्तत्वानियमात्समासो न स्यात् क्तेन च पूजायामिति निषेधात् । पुष्कराश्चावर्त्तकाश्च केचिन्मेघानां श्रेष्ठास्तेषां वंशे जातं महाकुलप्रसूतमित्यर्थः । कामरूपमिच्छाधीनविग्रहं दुर्गादिसञ्चारक्षममित्यर्थः ।

तेनार्थित्वं त्वयि विधिवशात् दूरवन्धुर्गतोऽहं
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा ॥६॥

तेन महाकुलप्रसूतत्वादिगुणयोगित्वेन हेतुना वि धिवशाद्दैवायत्तत्वात्। विधिर्व्विधाने दैवेचेत्यमरः। वशमायत्ते वशमिच्छाप्रभेदयोरिति विश्वः। दूरे बन्धुर्यस्य स दूरबन्धुः वियुक्तभार्य्योऽहं त्वय्यर्थित्वं गतः। ननु याचकस्य याच्ञायां याच्यगुणोत्कर्षः कुत्रोपयुज्यत इत्याशङ्क्य दैवाद्याच्ञाभङ्गेऽपि लाघवदोषाभावएवोपयोगइत्याह याच्ञेति। अधिगुणेऽधिकगुणे पुंसि विषये याच्ञा मोघा निष्फलापि वरमीषत्प्रियं दातुर्गुणाढ्यत्वात्प्रियत्वं याच्ञावैफल्यादीषत्प्रियत्वमिति भावः। अधमे निर्गुणे याच्ञा लब्धकामापि सफलापि न वरमीष त्प्रियमपि न भवतीत्यर्थः। देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीवे मनाक्प्रिये इत्यमरः। अर्थान्तरन्यासानुप्राणितः प्रेयोऽलङ्कारः। तदुक्तं दण्डिना। प्रेयः प्रियतराख्यानमिति। एतदाद्यपादत्रये चतुर्थपादस्थेनार्थान्तरन्यासेनोपजीवितमिति सुव्यक्तमेतत् ॥ ६ ॥

सन्तप्तानामिति। हे पयोद! त्वं सन्तप्तानाम् आतपेन वा प्रवासविरहेण वा संज्वरिता नाम्। सन्तापः संज्वरः समावित्यमरः शरणं

सन्तप्तानां त्वमसि शरणं तत् पयोद प्रियायाः
सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य।
गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां
बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या॥ ७॥

पयोदानेनातपखिन्नानां प्रोषितानां स्वस्थानप्रेरणया च रक्षकोसि। शरणं गृहरक्षित्रोरित्यमरः। तत्तस्मात्कारणाद्धनपतेः कुवेरस्य क्रोधेन विश्लेषितस्य प्रियया वियोजितस्य मे मम सन्देशं वार्त्तां प्रियायाः हर प्रियां प्रति नयेत्यर्थः। सम्बन्धसामान्ये षष्ठी। सन्देशहरणेनावयोः सन्तापं नुदेत्यर्थः। कुत्र स्थाने सा स्थिता तत् स्थानं वा कस्य तत्राह गन्तव्येति। वहिर्भवं वाह्यम्। बहिर्देवपञ्चजनेभ्यश्चेत्यण्। वाह्ये उद्याने स्थितस्य हरस्य शिरसि या चन्द्रिका तया धौतानि निर्म्मलानि हर्म्याणि धनिकभवनानि यस्यां सा तथोक्ता। हर्म्यादि धनिनां वास इत्यमरः। अनेन व्याकर्त्तव्यमुक्तम्। अलका नाम अलकेतिप्रसिद्धा यक्षेश्वराणां वसतिः स्थानं ते तत्र गन्तव्या त्वया गन्तव्येत्यर्थः। कृत्यानां कर्त्तरि षष्ठी॥ ७॥

मदर्थं प्रस्थितस्य ते पथिकाङ्गनाजनाश्वासनमानुषङ्गिकं फलमित्याह त्वामिति। पवनपदवीमाकाशमारूढं त्वां अध्वानं गच्छन्ति ते पथिकाः।

त्वामारूढं पवनपदवीमुद्गृहीतालकान्ताः
प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्वसत्यः।
कः सन्नद्धे विरहविधुरां त्वय्युपेक्षेत जायां
न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः ॥८॥

पथः" कन्निति कन्प्रत्ययः। तेषां वनिताः प्रोषितभर्तृकाः प्रत्ययात्प्रियागमनविश्वासात्। प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुष्वित्यमरः। आश्वसत्यो विश्वस्ताः। श्वसिधातोः शत्रन्तादुगितश्चेति ङीप्। तथोद्गृहीतालकान्ताः दृष्टिप्रसारार्थमुन्नमय्य धृतालकाग्राः सत्यः प्रेक्षिष्यन्ते अत्युत्कटतया द्रक्ष्यन्तीत्यर्थः। तथाहि त्वयि सन्नद्धे व्यापृते सति विरहेण विधुरां विवशां जायां क उपेक्षेत न कोपीत्यर्थः अन्योपि मद्व्यतिरिक्तोपि यो जनोऽहमिव पराधीनवृत्तिः परायत्तजीवको न स्यात् स्वतन्त्रस्तु न कोप्युपेक्षेतइत्यर्थान्तरन्यासः॥ ८॥

निमित्तान्यपि ते शुभानि इत्याह मन्दं मन्दमिति। अनुकूलः पवनो वायुस्त्वां मन्दं मन्दमतिमन्दमित्यर्थः। अत्र [कथञ्चिद्वीप्सायामेव द्विरुक्तिर्निर्वाह्या प्रकारे गुणवचनस्येत्येतदाश्रयणे तु कर्मधारयवद्भावे सुबलुकि मन्दमन्दमिति स्यात्त देवाह वामनः मन्दं मन्दमित्यत्राप्रकारार्थे द्विर्भाव इति। यथा सदृशं भाविफलानुरूपमित्यर्थः।

मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां
वामश्चायं नदति मधुरं चातकस्ते सगन्धः ।
गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः
सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः ॥ ८ ॥

यथा सादृश्ययोग्यत्ववीप्सास्वार्थानतिक्रमइति यादवः। नुदति प्रेरयति अयं सगन्धः सगर्व्वः सम्बन्धीति केचित्। गन्धो गन्धक आमोदे लेशे सम्बन्धगर्वयोरिति विश्वः । ते तव वामो वामभागस्थः। वामस्तु वक्रे रम्ये स्यात्सव्ये वामगतेपि चेति शब्दार्णवः। चातकः पक्षिविशेषश्च मधुरं श्राव्यं नदति व्याहरति इदं निमित्तद्वयं वर्त्तते वर्त्तिष्यते चापरं निमित्तमित्याह। गर्भेति। गर्भः कुक्षिस्थोजन्तुः। गर्भ इत्यारभ्यकुक्षौ कुक्षिस्थजन्तौ चेति यादवः। तस्याधानमुत्पादनं तदेव क्षणउत्सवः सुखहेतुत्वादिति भावः। निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षणइत्यमरः। तस्मिन् परिचयादभ्यासाद्धेतोः खे व्योम्नि आबद्धमालाः गर्भाधानसुखार्थं त्वत्समीपे बद्धपङ्क्तय इत्यर्थः। उक्तञ्च कर्णोदये। गर्भं बलाकादधतेऽभ्रयोगान्नाके निबद्धावलयः समन्तादिति। बलाकाः बलाकाङ्गनाः नयनसुभगं दृष्टिप्रियं भवन्तं नूनं सत्यं सेविष्यन्ते।

तांश्चावश्यं दिवसगणनातत्परामेकपत्नी
मव्यापन्नामविहतगति र्द्रच्यसि भ्रातृजायाम् ।
आशाबन्धः कुसुमसदृशं प्रायशोह्यङ्गनानां
सद्यःपाति प्रणयि हृदयं विप्रयोगे रुणद्धि ॥ १० ॥

नूनं सत्यं सेविष्यन्ते । अनुकूलमारुतचातकशब्दितवलाकादर्शनानां शुभसूचकत्वं शकुनशास्त्रे दृष्टं विस्तरभयान्नालेखि ॥ ९ ॥

नच तस्यानाशात् व्रतस्खलनाद्वा निरर्थकस्त्वत्प्रयास इत्याह

तांश्चेति । हे मेघ दिवसानामवशिष्टदिनानां गणनायां संख्याने तत्परामासक्ताम् । तत्परे प्रसितासक्ता वित्यमरः । अतएवाव्यापन्नाम् अमृतां शापावसाने मदागमनप्रत्याशया जोविनीमित्यर्थः । एकः पतिर्यस्याः सा एकपत्नी तां प्रतिव्रतामित्यर्थः । नित्यं सपत्न्यादिष्विति ङीप् नकारश्च । भ्रातुर्मे जायां भ्रातृजायां निःशङ्कं दर्शनीयामित्याशयः । तां मत्प्रियामअविहतगतिः सफलगतिः सन्नवश्यं द्रच्यसि च आलोकयिष्यसे एव । तथाहि आशा अतितृष्णा । आशा दिगतितृष्णयोरिति यादवः । बध्यतेऽनेनेति बन्धोबन्धनं वृन्तमिति यावत् आशैव बन्धः आशाबन्धः कर्त्ता प्रणयि प्रेमयुक्तम् अतएव कुसुमसदृशं सुकुमारमित्यर्थः । अतएव विप्रयोगे विरहे

कर्त्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रामवन्ध्यां
तच्छ्रुत्वा ते श्रवणसुभगं गर्ज्जितं मानसोत्काः।
आ कैलासाद्विसकिसलयच्छेदपाथेयवन्तः
सम्पत्स्यन्ते नभसि भवतो राजहंसाः सहायाः॥ ११॥

सद्यःपाति सद्योभ्रंशनशीलम् अङ्गनानां हृदयं जीवितं हृदयं जीविते चित्ते इति शब्दार्णवः। प्रायशः प्रायेण रुणद्धि प्रतिबध्नातीत्यर्थान्तरन्यासः॥ १०॥

सम्प्रति सहायसम्पत्तिश्चास्तीत्याह कर्त्तुमिति। यद्गर्ज्जितं कर्त्तृ महीमुच्छिलीन्ध्रामुद्भूतकन्दलिकाम्। कन्दल्याञ्च शिलीन्ध्रा स्यादिति शब्दार्णवः। अतएव अवन्ध्यां सफलां कर्त्तुं प्रभवति शक्नोति शिलीन्ध्राणां भाविशस्यसम्पत्तिसूचकत्वात् इति भावः। तदुक्तं निमित्तनिदाने। कालाभ्रयोगा दुदिताः शिलीन्ध्राः सम्पन्नशस्यां कथयन्ति धात्री मिति। तत् श्रवणसुभगं श्रोत्रसुखं लोकस्येति शेषः। ते तव गर्ज्जितं श्रुत्वा मानसोत्काः मानसे सरसि उन्मनसः उत्सुका इति यावत्। उत्क उन्मना इति निपातात्साधु। कालान्तरे मानसस्य हिम दुष्टत्वात् हिमस्य च हंसानां रोगहेतुत्वादन्यत्र गता हंसाः पुनर्वर्षासु मानसमेव गच्छन्तीतिप्रसिद्धिः। विसकिसलयानां मृणालाग्राणां छेदैः शकलैः

आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलं
वन्द्यैः पुंसां रघुपतिपदैरङ्कितं मेखलासु ।
काले काले भवति भवतो यस्य संयोगमेत्य
स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो वाष्पमुष्णम् ॥१२॥

पाथेयवन्तः पथि साधु पाथेयं पथि भोज्यम् । पथ्यतिथिवसतिस्वपतेर्ढञ् । तद्वन्तः मृणालकन्द शकलसम्बलवन्तइत्यर्थः । राजहंसा हंसविशेषाः । राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिता इत्य मरः । नभसि व्योम्नि भवतस्तव आ कैलासात् कैलासपर्य्यन्तं पदद्वयञ्चैतत् सहायाःसयात्राः । सहा यस्तुसयात्रःस्यादिति शब्दार्णवः । सम्पत्स्यन्ते सम्भ विष्यन्ति ॥ ११ ॥

आपृच्छस्वेति । प्रियं सखायं प्रियसखं रा जाहःसखिभ्यष्टजिति टच् समासान्तः । तुङ्गमुन्नतं पुंसां वन्द्यैः नराराधनीयैरघुपतिपदैरामपादन्या सैर्मेखलासु कटकेषु । अथ मेखला श्रोणिस्थाने ऽद्रिकटके,कटिबन्धेभबन्धने इति यादवः । अङ्कितं चिह्नितम् इत्थं सखित्वात् महत्त्वात् पवित्रत्वाच्च स म्भावनार्हममुं शैलं चित्रकूटाद्रिमालिङ्ग्य आपृच्छस्व साधो यामीत्यामन्त्रणेन सम्भाजय । आमन्त्रणसभा जने आप्रच्छनमित्यमरः । आङि नु प्रच्छोरित्या त्मनेपदम् । सखित्वं निर्व्वाहयति काले काले प्रति

मार्गं तावच्छृणु कथयतस्त्वत्प्रयाणानुरूपं
सन्देशं मे तदनु जलद श्रोष्यसि श्रोत्रपेयम् ।
खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र
क्षीणः क्षीणः परिलघुपयः स्रोतसाञ्चोपयुज्य ॥ १३ ॥

प्राट्टट्कालं सुहृत्समागमनकालस्य कालशब्देनो च्यते। वीप्सायां द्विरुक्तिः। भवतः संयोगं सम्पर्कमेत्य चिरविरहजम् उष्णं वाष्पमुष्माणं नेत्रजलञ्च। वाष्पो नेत्रजलोष्मणोरिति विश्वः। मुञ्चतो यस्य शैलस्य स्नेहव्यक्तिः प्रेमाविर्भावो भवति। स्निग्धानां हि विरहसङ्गतानां वाष्पपातो भवतीति भावः ॥ १२ ॥

सम्प्रति तस्य मार्गं कथयति

मार्गमिति। हे जलद तावदिदानीं कथयतो मत्तइति शेषः। त्वत्प्रयाणस्यानुरूपमनुकूलं मार्गमध्वानम्। मार्गो मृगपदे मासि सौम्यर्क्षेऽन्वेषणेऽध्वनीति यादवः। शृणु तदनु मार्गश्रवणानन्तरं श्रोत्राभ्यां पेयं पानार्हम् अतितृष्णया श्रोतव्यमित्यर्थः। पेयग्रहणात्सन्देशस्यामृतसाम्यं गम्यते। मे सन्देशं वाचिकम्। सन्देशवाग्वाचिकं स्यादित्यमरः। श्रोष्यसि। यत्र मार्गे खिन्नः खिन्नोऽभीक्ष्णं क्षीणबलः सन्। नित्यवीप्सयोरिति नित्यार्थे द्विर्भावः। शिखरिषु पर्वतेषु पदं न्यस्य निक्षिप्य पुनर्बललाभार्थं क्वचिद्विश्र

अद्रेः शृङ्गं हरति पवनः किंस्विदित्युन्मुखीभि
र्दृष्टोत्साहश्चकितचकितं मुग्धसिद्धाङ्गनाभिः।
स्थानादस्मात्सरसनिचुलादुत्पतोदङ्मुखः खं
दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान्॥[१४]॥

ष्येत्यर्थः क्षीणः क्षीणोऽभीक्ष्णं कृशाङ्गः सन् अत्रापि
कृदन्तत्वात्पूर्व्ववत् द्विरुक्तिः। स्रोतसां परिलघु गुरु
त्वदोषरहितमुपलास्फालन खेदितत्वात्पथ्यमित्यर्थः।
तथाच वाग्भटः। उपलास्फालनक्षेपविच्छेदैः खेदि
तोदकाः। हिमवन्मलयोद्भूताः पथ्या नद्यो भवन्त्यमू
रिति। पयः पानीयमुपयुज्य शरीरपोषणार्थमभ्य
वहृत्य च गन्तासि गमिष्यसि गमेर्लुट्॥ १३॥

अद्रेरिति। पवनोवायुरद्रेश्चित्रकूटस्य शृङ्गं
हरति किंस्वित्। किंस्विच्छब्दोविकल्पवितर्कार्था
दिषु पठितः। इति शङ्कया उन्मुखीभिरुन्नतमुखी
भिः। स्वाङ्गाच्चोपसर्ज्जनादसंयोगोपधादिति ङीष्।
मुग्धाभिर्मूढाभिः। मुग्धः सुन्दरमूढयोरित्यमरः।
सिद्धानां देवयोनिविशेषाणामङ्गनाभिःचकितचकितं
चकितप्रकारं यथा तथा। प्रकारे गुणवचनस्येति
द्विर्भावः। दृष्टोत्साहः दृष्टसंरम्भः सन् सरसाः
आर्द्राः निचुलाः स्थलवेतसा यस्मिन् तस्मात्। वा
नीरे कविभेदे स्यान्निचुलः स्थलवेतस इति शब्दा
र्णवः। अस्मात् स्थानादाश्रमात् पथि नभोमार्गे दिङ्

रत्नच्छायाव्यतिकर इव प्रेक्ष्यमेतत्पुरस्ता
द्वल्मीकाग्रात्प्रभवति धनुःखण्डमाखण्डलस्य॥

नागानां दिग्गजानां स्थूला ये हस्ताः करास्तेषामव लेपानाक्षेपान् परिहरन्। हस्तो नक्षत्रभेदे स्यात्क रेभकरयोरपीति। अवलेपस्तु गर्व्वे स्याल्लेपणे दूष णेऽपि चेति च विश्वः। उदङ्मुखः सन् अलकाया उदीच्यत्वादित्याशयः। खमाकाशम् उत्पत उद्ग च्छ। अत्रेदमप्यर्थान्तरं ध्वनयति। रसिको नि चुलो नाम महाकविः कालिदासस्य सहाध्यायः परापादितानां कालिदासप्रबन्धदूषणानां परिहर्त्ता यस्मिन् स्थाने तस्मात् स्थानादुदङ्मुखो निर्द्दोषत्वादु न्नतमुखः सन् दिङ्नागाचार्य्यस्य कालिदासप्रति पक्षस्य हस्तावलेपान् हस्तविन्यासपूर्व्वकाणि दूषणा नि परिहरन् अद्रेरद्रिकल्पस्य दिङ्नागाचार्य्यस्य शृङ्गं प्राधान्यम्। शृङ्गं प्राधान्यसान्वोश्चेत्यमरः। हरतीति हेतुना सिद्धैः सारस्वतसिद्धैः महाकवि भिरङ्गनाभिश्च दृष्टो त्साहःसन् खमुत्पत उच्चैर्भव इति स्वप्रबन्धमात्मानं वा प्रति कवेरुक्तिरिति। संसर्गतो दोषगुणा भवन्तीत्येतन्मृषा येन जलाशयेऽपि। स्थित्वा नुकूलं निचुलश्चलन्तमात्मानमारक्षति सिन्धु वेगादि त्येतत्स्लोकनिर्म्माणात्तस्य कवेर्निचुलसंज्ञेति॥ १४॥

रत्नेति। रत्नच्छायानां पद्मरागादिमणिप्रभा

येन श्यामं वपुरतितरां कान्तिमापत्स्यते ते
बर्हेणेव स्फुरितरुचिना गोपवेशस्य विष्णोः ॥ १५ ॥
त्वय्यायत्तं कृषिफलमिति भ्रूविलासानभिज्ञैः
प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः ।
सद्यः सीरोत्कषणसुरभि क्षेत्रमारुह्य मालं
किञ्चित्पश्चाद्व्रज लघुगतिर्भूय एवोत्तरेण ॥ १६ ॥

णां व्यतिकरोमिश्रणमिव प्रेक्ष्यं दर्शनीयमाखण्डलस्येन्द्रस्य धनुःखण्डमेतदिति हस्तेन निर्देशः। पुरस्तादग्रे वल्मीकाग्राद्वामलूरविवराग्रात् । वामलूरश्च नाकुश्च वल्मीकं पुंनपुंसकमित्यमरः। प्रभवति आविर्भवति । येन धनुःखण्डेन ते तव श्यामं वपुः स्फुरितरुचिना उज्ज्वलकान्तिना बर्हेण पिच्छेन । पिच्छबर्हे नपुंसके इत्यमरः । गोपवेशस्य विष्णोर्गोपालस्य कृष्णस्य श्यामं वपुरिवातितरां कान्तिं शोभामापत्स्यते प्राप्स्यते ॥ १५ ॥

त्वयोति । कृषेर्हलकर्मणः फलं शस्यं त्वयि । अधिकरणविवक्षायां सप्तमी । आयत्तमधीनम् । अधीनो निघ्न आयत्त इत्यमरः । इति हेतोः प्रीत्या स्निग्धैरकृत्रिमप्रेमार्द्रैरित्यर्थः । भ्रूविलासानां भ्रूविकाराणामनभिज्ञैः पामरत्वादिति शेषः । जनपदवधूनां पल्लीयोषितां लोचनैः पीयमानः सादरं वीक्ष्यमाणः सन् मालं मालाख्यं क्षेत्रं शैलप्रा

त्वामासारप्रशमितवनोपप्लवं साधु मूर्भ्रा
वच्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः।
न चुद्रोऽपि प्रथमसुकृतापेचया संश्रयाय
प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः॥ १७ ॥

यमुन्नतस्थलम्। मालमुन्नतभूतलमित्युत्पलः। सद्यस्तत्कालमेव सीरैर्हलैः उत्कर्षणेन सुरभि घ्राणतर्पणं यथा तथा आरुह्य तत्राभिवृष्येत्यर्थः। सुरभि घ्राणतर्पण इत्यमरः। किञ्चित्पश्चाद्व्रज गच्छ। लघुगतिस्तत्र निर्वृष्टत्वात् चिप्रगमनः सन्। लघु चिप्रमरं द्रुतमित्यमरः। भूयः पुनरपि उत्तरेणैव उत्तरमार्गेणैव व्रज। तृतीयाभिधाने प्रकृत्यादिभ्यः उपसंख्यानमिति तृतीया। यथा कश्चिद्दच्चवल्लभःपतिः कुत्रचित् चेत्रे कलत्रे गूढं विहृत्य। चेत्रं शरीरे केदारे सिद्धस्थानकलत्रयोरिति विश्वः। दाचिण्यभङ्गभयान्नीचमार्गेण निर्गत्य पुनः सर्व्वाध्यचं सञ्चरति तद्वदिति ध्वनिः॥ १६॥

त्वामिति। आम्राश्चूताः कूटेषु शिखरेषु यस्य स आम्रकूटो नाम सानुमान् पर्व्वतः। आम्रश्चूतो रसालोऽसौ इति। कूटोऽस्त्री शिखरं शृङ्गमिति चामरः। आसारो धारावृष्टिः। धारासम्पात आसार इत्यमरः। तेन प्रशमितो वनोप्लवो दावाग्निर्येन तं कृतोपकारमित्यर्थः। अध्वश्रमेण परि

छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रै
स्त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे ।
नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां
मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः ॥१८॥

गतं व्याप्तं त्वां साधु सम्यक् मूर्ध्ना वक्ष्यति वोढा। वहेर्लृट्। तथाहि क्षुद्रः कृपणोऽपि। क्षुद्रो दरिद्रे कृपणे नृशंस इति यादवः। संश्रयाय संश्रयणाय मित्रे सुहृदि प्राप्ते आगते सति प्रथमसुकृतापेक्षया पूर्व्वोपकारपर्य्यालोचनया विमुखो न भवति यस्तथा तेन प्रकारेणोच्चैरुन्नतः स आम्रकूटः किं पुनः विमुखो न भवतीति किमु वक्तव्यमित्यर्थः। एतेन प्रथमावसथे सौख्यलाभात्ते कार्य्यसिद्धिरस्तीति सूचितम्। तदुक्तं निमित्तनिदाने। प्रथमावसथे यस्य सौख्यं तस्याखिलेऽध्वनि। शिवं भवति यात्रायामन्यथा त्वशुभं ध्रुवमिति॥ १७॥

छन्नेति। हे मेघ परिणतैः परिपक्वैः फलैर्द्योतन्त इति तथोक्तैः। आषाढे वनचूताः फलन्ति पच्यन्ते च मेघवातेनेत्याशयः। काननाम्रैर्वनचूतैश्छन्नोपान्तः आवृतपार्श्वोऽचल आम्रकूटाद्रिः स्निग्धवेणीसवर्णे मसृणकेशबन्धच्छाये श्यामवर्णे इत्यर्थः। वेणी तु केशबन्धे जलस्रुतौ इति यादवः। त्वयि शिखरं शृङ्गमारूढे सति। यस्य च भावेन

अध्वक्लान्तं प्रतिमुखगतं सानुमानाम्रकूट
स्तुङ्गेन त्वां जलद शिरसा वक्ष्यति श्लाघमानः।
आसारेण त्वमपि शमयेस्तस्य नैदाघमग्निं
सद्भावार्द्रः फलति नचिरेणोपकारो महत्सु॥ ० ॥
स्थित्वा तस्मिन् वनचरवधूभुक्तकुञ्जे मुहूर्त्तं
तोयोत्सर्गद्रुततरगति स्तत्परं वर्त्म तीर्णः।
रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णां
भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य ॥ १९ ॥

भावलक्षणमिति सप्तमी। मध्ये श्यामः शेषे मध्या दन्यत्र विस्तारे परितः पाण्डुः हरिणः। हरिणः पाण्डुरः पाण्डुरित्यमरः। भुवः स्तन इव अमरमिथुनानां खेचराणामिति भावः। प्रेक्षणीयां दर्शनीयामवस्थां नूनं यास्यति। यथा पथि क्लान्तः कश्चित्कामी कामिनीनां कुचकलशे विश्रान्तः सन् स्वपिति तद्वत्त्वानपि भुवो नायिकायाः स्तने इति ध्वनिः॥ १८॥

स्थित्वेति। हे मेघ वने चरन्तीति वनचराः। तत्पुरुषे कृतिबहुलमिति बहुलग्रहणाल्लुग्भवति। तेषां वधूभिर्भुक्ताः कुञ्जा लतागृहा यत्र तस्मिन्। निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे इत्यमरः। तत्र ते नयनविनोदोऽस्तीत्यर्थः। तस्मिन्नाम्रकूटे मुहूर्त्तमल्पकालं न तु चिरं स्वकार्य्यविरो

तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टि-
र्जम्बूकुञ्जप्रतिहतरयं तोयमादाय गच्छेः ।
अन्तःसारं घन तुलयितुं नानिलः शक्ष्यति त्वां
रिक्तः सर्व्वो भवति हि लघुः पूर्णता गौरवाय ॥ २० ॥

धादिति भावः । मुहूर्त्तमल्पकाले स्याद्घटिकादित
येपि चेति शब्दार्णवः । स्थित्वा विश्रम्य तोयोत्स
र्गेण त्वामासारेद्धक्षवर्षेण द्रुततरगतिर्लाघवाद्वे
तोरतिच्छि प्रगरूनः सन् तस्मादाम्रकूटात्परम् अन
न्तरं तत्परं वर्त्म मार्गं तीर्णोऽतिक्रान्तः उपलैः
पाषाणैः विषमे विन्ध्यस्याद्रेः पादे प्रत्यन्तपर्व्वते ।
पादाः प्रत्यन्तपर्व्वता इत्यमरः । विशीर्णां समन्ततो
विस्तृमराम् । एतेन कस्याश्चित्कामुक्याः प्रियतम
चरणपातोपि ध्वन्यते । रेवां नर्म्मदाम् । रेवा तु
नर्म्मदा सोमोद्भवा मेखलकन्यकेत्यमरः । गजस्याङ्गे
शरीरे भक्तयोरचनाः रेखा इति यावत् । भक्ति
र्निषेवणे भागे रचनायामिति शब्दार्णवः । तासां
छेदैर्भङ्गिभिर्व्विरचितां भूतिं शृङ्गारमिव । भूति
र्म्मातङ्गशृङ्गारे जातौ भस्मनि सम्पदीति विश्वः ।
द्रक्ष्यसि अयमपि महांस्ते नयनकौतुकलाभ इति
भावः ॥ १९ ॥

तस्यादिति । हे मेघ वान्तवृष्टिरुद्गीर्णवर्षः सन्
कृतवमनस्य व्यज्यते तिक्तैः सुगन्धिभिस्तिक्तर

कर्त्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रामवन्ध्यां
तच्छ्रुत्वा ते श्रवणसुभगं गर्ज्जितं मानसोत्काः ।
आ कैलासाद्बिसकिसलयच्छेदपाथेयवन्तः
सम्पत्स्यन्ते नभसि भवतो राजहंसाः सहायाः ॥ ११ ॥

सद्यःपाति सद्योभ्रंशनशीलम् अङ्गनानां हृदयं जीवितं हृदयं जीविते चित्ते इति शब्दार्णवः । प्रायशः प्रायेण रुणद्धि प्रतिबध्नातीत्यर्थान्तरन्यासः ॥ १० ॥

सम्प्रति सहायसम्पत्तिश्चास्तीत्याह कर्त्तुमिति । यद्गर्ज्जितं कर्त्तुं महीमुच्छिलीन्ध्रामुद्भूतकन्दलिकाम् । कन्दल्याञ्च शिलीन्ध्रः स्यादिति शब्दार्णवः । अतएव अवन्ध्यां सफलां कर्त्तुं प्रभवति शक्नोति शिलीन्ध्राणां भाविशस्यसम्पत्तिसूचकत्वात् इति भावः । तदुक्तं निमित्तनिदाने । कालाभ्रयोगादुदिताः शिलीन्ध्राः सम्पन्नशस्यां कथयन्ति धात्रीमिति । तत् श्रवणसुभगं श्रोत्रसुखं लोकस्येति शेषः । ते तव गर्ज्जितं श्रुत्वा मानसोत्काः मानसे सरसि उन्मनसः उत्सुका इति यावत् । उत्क उन्मना इति निपातात्साधु । कालान्तरे मानसस्य हिमदुष्टत्वात् हिमस्य च हंसानां रोगहेतुत्वादन्यत्र गता हंसाः पुनर्वर्षासु मानसमेव गच्छन्तीति प्रसिद्धिः । बिसकिसलयानां मृणालाग्राणां छेदैः शकलैः

आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलं
वन्द्यैः पुंसां रघुपतिपदैरङ्कितं मेखलासु ।
काले काले भवति भवतो यस्य संयोगमेत्य
स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो वाष्पमुष्णम् ॥१२॥

पाथेयवन्तः पथि साधु पाथेयं पथि भोज्यम् । पथ्यतिथिवसतिस्वपतेर्ढञ् । तद्वन्तः मृणालकन्द शकलसम्बलवन्तइत्यर्थः । राजहंसा हंसविशेषाः । राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिता इत्यमरः । नभसि व्योम्नि भवतस्तव आ कैलासात् कैलासपर्य्यन्तं पदद्वयञ्चैतत् सहायाःसयात्राः । सहायस्तु सयात्रःस्यादिति शब्दार्णवः । सम्पत्स्यन्ते सम्भविष्यन्ति ॥ ११ ॥

आपृच्छस्वेति । प्रियं सखायं प्रियसखं राजाहःसखिभ्यष्टजिति टच् समासान्तः । तुङ्गमुन्नतं पुंसां वन्द्यैः नराराधनीयैरघुपतिपदैरामपादन्यासैर्मेखलासु कटकेषु । अथ मेखला श्रोणिस्थाने ऽद्रिकटके,कटिबन्धेभवन्धने इति यादवः । अङ्कितं चिह्नितम् इत्थं सखित्वात् महत्त्वात् पवित्रत्वाच्च सम्भावनार्हममुं शैलं चित्रकूटाद्रिमालिङ्ग्य आपृच्छस्व साधो यामीत्यामन्त्रणेन सभाजय । आमन्त्रणसभाजने आप्रच्छनमित्यमरः । आङि तु पृच्छोरित्यात्मनेपदम् । सखित्वं निर्व्वाहयति काले काले प्रति

उत्पश्यामि द्रुतमपि सखे मत्प्रियार्थं यियासोः
कालक्षेपं ककुभसुरभौ पर्व्वते पर्व्वते ते ।
शुक्लापाङ्गैः सजलनयनैः स्वागतीकृत्य केकाः
प्रत्युद्यातः कथमपि भवान् गन्तुमाशु व्यवस्येत् ॥ २३ ॥

न चातकस्य हितमिति शास्त्रात् भूस्पृष्टोदकस्य तेषां रोगहेतुत्वादन्तराले एव स्वीकारे चतुरांस्तात कान् वीक्षमाणाः कौतुकात् पश्यन्तः श्रेणीभूताः बद्धपङ्क्तीः। अभूततद्भावे च्विः। वलाकाः वक पङ्क्तीः परिगणनया एका द्वे तिस्र इति संख्या नेन निर्द्दिशन्तो हस्तेन दर्शयन्तः सिद्धाः स्तनि तसमये त्वद्गर्ज्जितकाले सोत्कम्पानि उत्कम्पपूर्व्वकाणि प्रियसहचरीणां सम्भ्रमेणालिङ्गितानि आसाद्य स्वयं ग्रहणाश्लेषसुखमनुभूयेत्यर्थः। त्वां मानयिष्यन्ति त्वन्निमित्तत्वात् सुखलाभस्येति भावः ॥ २२ ॥

उत्पश्यामीति। हे सखे मेघ मत्प्रियार्थं यथा तथा द्रुतं क्षिप्रम्। लघु क्षिप्रमरं द्रुतमित्यमरः। यियासोः यातुमिच्छोरपि। यातेः सन्नन्तादुप्रत्ययः। ते तव ककुभैः कुटजकुसुमैः सुरभौ सुगन्धिनि। ककुभः कुटजोऽर्ज्जुन इति शब्दार्णवः। पर्व्वते पर्व्वते प्रतिपर्व्वतम्। वीप्सायां द्विरुक्तिः। कालक्षेपं कालविलम्बम्। क्षेपो विलम्बे

पाण्डुच्छायोपवनहतयः केतकैः सूचिभिन्नै
र्नीडारम्भैर्गृहबलिभुजामाकुलग्रामचैत्याः ।
त्वय्यासन्ने परिणतफलश्यामजम्बूवनान्ताः
सम्पत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः॥ २४॥

निन्दायामिति विश्वः। उत्पश्यामि उत्प्रेक्षे। विलम्बहेतुं दर्शयन्नाशुगमनं प्रार्थयते शुक्लेति। सजलानि सानन्दवाष्पाणि नयनानि येषां तैः शुक्लापाङ्गैर्म्मयूरैः। मयूरोवर्हिणोवर्ही शुक्लापाङ्गः शिखावल इति यादवः। केकाः स्ववाणीः। केका वाणी मयूरस्येत्यमरः। स्वागतीकृत्य स्वागतवचनीकृत्य प्रत्युद्यातः प्रत्युद्गतः कृतातिथ्यइत्यर्थः। भवान् कथमपि यथाकथञ्चित् आशु गन्तुं व्यवस्येत् उद्युञ्जीत। प्रार्थने लिङ्। शेषे प्रथम इति प्रथम पुरुषः। शेषश्चायं भवच्छब्दोयुष्मदस्मच्छब्दव्यतिरेकात्। स्वागतीकृत्य केका इत्यत्र केकास्वारोप्यमाणस्य स्वागतवचनस्य प्रकृतप्रत्युद्गमनोपयोगात् परिणामालङ्कारः। तदुक्तमलङ्कारसर्व्वस्वे। आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणाम इति॥ २३ ॥

पाण्डुच्छायेति। हे मेघ त्वय्यासन्ने सन्निकृष्टे सति दशार्णा नाम जनपदाः सूचिभिन्नैः सूचिषु मुकुलाग्रेषु भिन्नैर्व्विकसितैः। मुकुलाग्रेषु सूचिः स्यादिति

तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीं
गत्वा सद्यः फलमविकलं कामुकत्वस्य लब्ध्वा।
तीरोपान्तस्तनितसुभगं पास्यसि स्वादु यस्मात्
सभ्रूभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्म्मि॥ २५ ॥

शब्दार्णवः। केतकैः केतकीकुसुमैः पाण्डुच्छायाः हरिणवर्णाः उपवनानां वृतयः कण्टकशाखावरणा येषु ते तथोक्ताः। प्राकारो वरणः सालःप्राचीरं प्रान्ततोवृतिरित्यमरः। तथा गृहबलिभुजां काकादिग्रामपक्षिणां नीडारम्भैः कुलायनिर्म्माणैः। कुलायो नीडमस्त्रियामित्यमरः। आकुलानि सङ्कीर्णानि ग्रामेषु चैत्यानि रथ्यावृक्षाः येषु ते तथोक्ताः। चैत्यमायतने बुद्धवन्द्ये चोद्देश पातप इति विश्वः। तथा परिणतैः पक्वैः फलैः श्यामानि यानि जम्बूवनानि तैरन्ताः रम्याः। म्रृतावत्रसिते रम्ये समाप्तावन्त इष्यते इति शब्दार्णवे। तथा कतिपयेष्वेव दिनेषु स्थायिनो हंसा येषु ते तथोक्ताः एवंविधाः सम्पत्स्यन्ते भविष्यन्ति॥ २४॥

तेषामिति। दिक्षु प्रथितं प्रसिद्धं विदिशेति लक्षणं नामधेयं यस्यास्ताम्। लक्षणं नाम्नि चिह्ने चेति विश्वः। तेषां दशार्णानां सम्बन्धिनीं राजानो धीयन्ते यस्यामिति राजधानी। कालाधिकरणयोश्चेति ल्युट् कृद्योगलक्षणा षष्ठी समस्त

नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतो
स्त्वत्सम्पर्कात् पुलकितमिव प्रौढ़पुष्पैः कदम्बैः।
यः पण्यस्त्रीरतिपरिमलोद्गारिभिर्न्नागराणा
मुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि॥ २६॥

इति वक्तव्यात् समासः। तां राजधानीं प्रधाननगरीम्। प्रधाननगरी राज्ञां राजधानीति कथ्यत इति शब्दार्णवे। गत्वा प्राप्य सद्यः कामुकात्वस्य विलासितायाः। विलासी कामुकः कामी स्त्रीपरो रतिलम्पट इति शब्दार्णवे। अविकलं समग्रं फलं प्रयोजनं लब्धा लप्स्यते त्वयेति शेषः कर्म्मणि लुट्। कुतः यस्मात् कारणात् स्वादु मधुरम्। चला ऊर्म्मयो यस्य तच्चलोर्म्मि तरङ्गितं वेत्रवत्या नाम नद्याः पयः सभ्रूभङ्गं भ्रूकुटियुक्तं दशनपीडयेति भावः। मुखमिवाधरमिवेत्यर्थः। तीरोपान्ते तटप्रान्ते यत् स्तनितं गर्ज्जितं तेन सुभगं यथा तथा स्तनितशब्देन मणितमपि व्यपदिश्यते। ऊर्द्ध्वमुच्चलितकण्ठनासिकं ऊङ्कृतं स्तनितमल्पघोषवदिति लक्षणात्। पास्यसि पिवतेर्लृट्। कामिनामधरास्वादः सुरतादतिरिच्यत इति भावः॥ २५॥

नीचैरिति। हे मेघ तत्र विदिशासमीपे विश्रामः खेदापनयः। भावे घञ्प्रत्ययः। तस्य हेतोः विश्रामार्थमित्यर्थः। षष्ठी हेतुप्रयोगे इति षष्ठी।

विश्रान्तः सन् व्रज वननदीतीरजातानि सिञ्च
न्नुद्यानानां वनजलकणैर्यूथिकाजालकानि।

प्रौढ़पुष्पैः प्रचुरकुसुमैः कदम्बैर्नीपवृक्षैः त्वत्सम्प र्कात् तव सङ्गात् पुलका अस्य जाताः पुलकित मिव सञ्जातपुलकमिव स्थितम्। तारकादित्वादि तच्प्रत्ययः। नीचैरित्याख्या यस्य तं नीचैराख्यं गि रिमधिवसेः गिरौ वसेत्यर्थः। उपान्वध्याङ् वस इति कर्म्मत्वम्। यो नीचैर्गिरिः पण्याः क्रेयाः स्त्रियः पण्यस्त्रियो वेश्याः। वारस्त्री गणिका वेश्या पण्य स्त्री उपजीविनीति शब्दार्णवे। तासां रतिषु यः परिमलो गन्धविशेषः। विमर्द्दोत्थे परिमलो गन्धे जनमनोहरे इत्यमरः। तमुद्गिरन्त्याविष्कुर्व्वन्तीति तथोक्तानि तैः शिलावेश्मभिः कन्दरैः नागराणां पौ राणामुद्दामान्युत्कटानि यौवनानि प्रथयति प्रकट यति। उत्कटयौवनाः क्वचिदनुरक्ताः वाराङ्गना विश्रम्भविहाराकाङ्क्षिण्यो मातादिभयान्निशी थसमये कञ्चन विविक्तं देशमाश्रित्य रमयन्तीति प्रसिद्धिः॥ २६॥

विश्रान्तइति। विश्रान्तः सन् तत्र नीचैर्गिरौ विनीताध्वश्रमः सन् वने अरण्ये या नद्यस्तासां तीरेषु जातानि स्वयं रूढ़ानि अकृत्रिमाणीत्यर्थः। नदनदीति पाठे पुमान् स्त्रियेत्येकशेषो दुर्व्वारः।

गण्डस्वेदापनयनरुजाक्लान्तकर्णोत्पलानां
छायादानात् क्षणपरिचितः पुष्पलावीमुखानाम्॥२७॥

उद्यानानामारामाणां सम्बन्धीनि यूथिकाजालका नि मागधीकुसुममुकुलानि । अथ मागधी गणिका यूथिकेत्यमरः । कोरकजालककलिकाकुट्मल मुकु लानि तुल्यानीति हलायुधः । नवजलकणैः सिञ्च न्नार्द्रीकुर्व्वन् । अत्र सिञ्चतेरार्द्रीकरणार्थत्वे द्रव द्रव्यस्य करणत्वम् अन्यार्थत्वे तु कर्म्मत्वम् । यथा रेतः सिक्ता कुमारीषु सुखैर्निषिञ्चन्तमिवामृतं त्वचीत्येवमादि । एवं किरतीत्यादीनामपि रजः किरति मारुतः अवाकिरन् वयोवृद्धास्तं लाजैः पौरयोषित इत्यादिष्वर्थभेदाश्रयणेन रजोलाजानां कर्म्मत्वकरणत्वे गमयितव्ये। तथा गण्डयोः कपो लयोः स्वेदस्यापनयनेन प्रमार्ज्जनेन या रुजा पीडा भिदादित्वादङ्प्रत्ययः । तया क्लान्तानि म्लानानि कर्णोत्पलानि येषां तेषां तथोक्तानाम् । पुष्पाणि लुन न्तीति पुष्पलाव्यः पुष्पवचायिकाः स्त्रियः । कर्म्म ण्यण् टिड्ढाणञित्यादिना ङीप् । तासां मुखानि । छायाया अनातपस्य दानात कान्तिदानञ्च ध्वन्यते । छाया सूर्य्यप्रिया कान्तिः प्रतिबिम्बमनातप इत्यमरः । कामुकदर्शनात्कामिनीनां मुखविकाशो भवतीति

वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां
सौधोत्सङ्गप्रणयविमुखोमास्मभूरुज्जयिन्याः।
विद्युद्दामस्फुरितचकितैस्तत्र पौराङ्गनानां
लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि॥ २८॥

भावः। क्षणपरिचितः क्षणं संसृष्टः सन् नतु चिरं व्रज गच्छ॥ २७॥

वक्रइति। उत्तराशामुदीचीं दिशं प्रति प्रस्थितस्य भवतः पन्थाः उज्जयिनीमार्गः वक्रोयदपि दूरो॰ यद्यपीत्यर्थः। विन्ध्यादुत्तरवाहिन्यानिर्विन्ध्यायाः प्रागभागे कियत्यपि दूरे स्थिता उज्जयिनी उत्तरपथस्तु निर्विन्ध्यायाः पश्चिमइति वक्रत्वम्। तथाप्युज्जयिन्याः विशालानगरस्य। विशालोज्जयिनी समेत्युत्पलः। सौधानामुत्सङ्गेषु परिभागेषु प्रणयः परिचयः। प्रणयः स्यात्परिचये याच्ञायां सौहृदेपि चेति यादवः। तस्य विमुखः पराङ्मुखोमास्म भूः न भवेत्यर्थः। स्मोत्तरे लङ् चेति चकाराद्दाशीरर्थे लुङ्। न माङ्योगइत्यडागमप्रतिषेधः। तत्रोज्जयिन्यां विद्युद्दाम्नां विद्युल्लतानां स्फुरितेभ्यः स्फुरणेभ्यश्चकितैर्भीतैर्लोलापाङ्गैश्चञ्चलकटाक्षैः पौराङ्गनानां लोचनैर्न रमसे यदि। तर्हि त्वं वञ्चितः प्रतारितोऽसि जन्मवैफल्यं भवेदित्यर्थः॥ २८॥

वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः
संसर्पन्त्याः स्खलितसुभगं दर्शितावर्त्तनाभेः ।
निर्व्विन्ध्यायाः पथि भव रसाभ्यन्तरः सन्निपत्य
स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु ॥ २८ ॥

सम्प्रत्युज्जयिनीं गच्छतस्तस्य मध्ये मार्गं निर्व्वि न्ध्यासम्बन्धमाह

वीचीति । हे सखे पथि उज्जयिनीपथे वीचिक्षोभेण तरङ्गचलनेन स्तनितानां मुखरानाम् । कर्त्तरि क्तः । विहगानां हंसानां श्रेणिः पङ्क्तिरेव काञ्चीगुणो यस्यास्तस्याः स्खलितेनोपलस्खलनेन मदस्खलितेन च सुभगं यथा तथा संसर्पन्त्याः प्रवहन्त्या गच्छन्त्याश्च तथा दर्शिता प्रकटिता आवर्त्तोऽम्भसां भ्रमएव नाभिर्यया । स्यादावर्त्तोऽम्भसां भ्रमइत्यमरः । निष्क्रान्ता विन्ध्यान्निर्व्विन्ध्या नाम नदी । निरादयः क्रान्ताद्यर्थे पञ्चम्येति समासः । द्विगुप्राप्तापन्नेत्यादिना परवल्लिङ्गताप्रतिषेधः । तस्याः नद्याः सन्निपत्य सङ्गत्य रसो जलमभ्यन्तरे यस्य सः अन्यत्र रसेन शृङ्गारेणाभ्यन्तरः अन्तरङ्गो भव सर्व्वथा तस्यारसमनु भवेत्यर्थः । शृङ्गारादौ जले वीर्य्ये सुवर्णे विषशुक्रयोः । आस्वादे च रसं प्राज्ञरिति शब्दार्णवः । ननु तत्प्रार्थनामन्तरेण कथं तत्रानुभवो युज्यते इत्यतआह स्त्रीणामिति । स्त्रीणां प्रियेषु विभ्र

वेणीभूतप्रतनुसलिलासावतीतस्य सिन्धुः
पाण्डुच्छाया तटरुहतरुभ्रंशिभिर्जीर्णपर्णैः ।
सौभाग्यं ते सुभग विरहावस्थया व्यञ्जयन्ती
कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः ॥ ३० ॥

मो विलास एवाद्यं प्रणयवचनं प्रार्थनावाक्यं हि। स्त्रीणामेष स्वभावो यद्विलासैरेव रागप्रकाशनं ननु कण्ठतइति । विभ्रमस्त्वत्र नाक्षिसन्दर्शनादिरुक्तएव ॥ २९ ॥

निर्विन्ध्याया विरहावस्थां वर्णयन् तन्निराकरणं प्रार्थयते

वेणीति । अवेणी वेणीभूतं वेण्याकारं प्रतनु स्तोकञ्च सलिलं यस्याः सा तथोक्ता वेणीभूतकेशपाशा इति च ध्वन्यते । रुहन्तीति रुहाः । इगुपधलक्षणः कः। तटयो रुहा ये तरवस्तेभ्यो भ्रश्यन्तीति तथोक्तैः जीर्णपर्णैः शुष्कपत्रैः पाण्डुच्छाया पाण्डुवर्णा अतएव हे सुभग विरहावस्थया पूर्वोक्तप्रकारया कारणेन अतीतस्य एतावन्तं कालमतीत्य गतस्य प्रोषितस्येत्यर्थः । ते तव सौभाग्यं सुभगत्वम्। हृद्भगसिन्ध्वन्ते पूर्वपदस्य चेत्युभयपदवृद्धिः । व्यञ्जयन्ती प्रकाशयन्ती। स खलु सुभगोयमङ्गनाः कामयन्ते इति भावः। असौ पूर्वोक्ता सिन्धुर्नदी निर्विन्ध्या। स्त्री नद्यां नारदे सिन्धुर्देश

प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान्
पूर्व्वोद्दिष्टामनुसर पुरीं श्रीविशालां विशालाम्।

भेदेऽम्बुधौ गजइति वैजयन्ती। येन विधिना व्यापारेण कार्य्यन्त्यजति सविधिस्त्वयैवोपपाद्यः कर्त्तव्य इत्यर्थः। स च विधिरेकत्र दृष्टिरन्यत्र सम्भोगः तद्भावनिवन्धनत्वात्कार्श्यस्येति भावः। इयं पञ्चमी मदनावस्था। यदुक्तं रतिरहस्ये। नयनप्रीतिः प्रथमं चित्तासङ्गस्ततोऽथ सङ्कल्पः। निद्राच्छेदस्तनुता विषयनिवृत्तिस्त्रपानाशः। उन्मादो मूर्च्छा मृतिरित्येताः स्मरदशा दशैव स्युरिति। तामतीतस्येति पाठमाश्रित्य सिन्धुर्नाम नद्यन्तरमिति व्याख्यातं किन्तु सिन्धुर्नाम कश्चिन्नदः काश्मीरदेशे स्थितः नदीतु कुत्रापि नास्तीति एतदुपेक्ष्यम् ॥ ३०॥

प्राप्येति। विदन्तीति विदाः। इगुपधलक्षणः कः। ओकसो वेद्यस्थानस्य विदाः कोविदाः ओकारलुप्ते पृषोदरादित्वात्साधुः। उदयनस्य वत्सराजस्य कथानां वासवदत्ताहरणाद्यद्भुतोपाख्यानानां कोविदास्तत्वज्ञाः ग्रामेषु ये वृद्धास्ते सन्ति येषु तान् अवन्तीन् तन्नामजनपदान् प्राप्य तत्र पूर्व्वोद्दिष्टां पूर्व्वोक्तां सौधोत्सङ्गप्रणयविमुखोमास्म भूरुज्जयिन्या इत्युक्तां श्रीविशालां सम्पत्तिमहतीम्। शोभासम्पत्तिप्रज्ञासु लक्ष्मीः श्रीरिव दृश्य

स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां
शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत्खण्डमेकम् ॥ ३१ ॥

हारांस्तारांस्तरलगुटिकान् कोटिशः शङ्खशुक्तीः
शष्पश्यामान्मरकतमणीनुन्मयूखप्ररोहान् ।
दृष्ट्वा यस्यां विपणिरचितान् विद्रुमाणाञ्च भङ्गान्
संलक्ष्यन्ते सलिलनिधयस्तोयमात्रावशेषाः ॥ ० ॥

प्रद्योतस्य प्रियदुहितरं वत्सराजोऽत्र जह्रे
हैमं तालद्रुमवनमभूदत्र तस्यैव राज्ञः ।
अत्रोद्भ्रान्तः किल नलगिरिः स्तम्भमुत्पाट्य दर्पा
दित्यागन्तून् रमयति जनो यत्र बन्धूनभिज्ञः ॥ ० ॥

पत्रश्यामा दिनकरहयस्पर्द्धिनो यत्र वाहाः
शैलोदग्रास्त्वमिव करिणो वृष्टिमन्तः प्रभेदात् ।

तद्वति शाश्वतः । विशालां पुरीमुज्जयिनीमनुसर व्रज । कथमिव स्थितां सुचरितफले पुण्यफले स्वर्गोपभोगलक्षणे स्वल्पीभूतेऽत्यल्पावशिष्टे सतीत्यर्थः । गां भूमिं गतानां पुनरपि भूलोकगतानामित्यर्थः । स्वर्गिणां स्वर्गवतां जनानां शेषैर्भुक्तशिष्टैः पुण्यैः सुकृतैः हृतमानीतं कान्तिरस्यास्तीति कान्तिमदुज्ज्वलं सारभूतमित्यर्थः । एकं भुक्तादन्यत् । एके मुख्यान्यकेवला इत्यमरः । दिवः स्वर्गस्य खण्डमिव स्थितामित्युत्प्रेक्षा । एतेनातिक्रान्तसकलभूलोकनगरसौभाग्यसारत्वमुज्जयिन्याव्यज्यते ॥ ३१ ॥

योधाग्रण्यः प्रतिदशमुखं संयुगे तस्थिवांसः
प्रत्यादिष्टाभरणरुचयश्चन्द्रहासव्रणाङ्कैः ॥ ० ॥
दीर्घी कुर्वन् पटु मदकलं कूजितं सारसानां
प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः।

दीर्घीकुर्व्वन्निति। यत्र विशालायां प्रत्यूषेषु अहर्म्मुखेषु। प्रत्यूषोऽहर्म्मुखं कल्यमित्यमरः। पटु प्रस्फुटं मदकलं मदेनाव्यक्तमधुरम्। ध्वनौ तु मधुरास्फुटे कल इत्यमरः। सारसानां पक्षिविशेषाणाम। सारसो मैथुनी कामी गोनर्द्दः पुष्कराह्वय इति यादवः। यद्वा सारसानां हंसानाम्। चक्राङ्गः सारसो हंस इति शब्दार्णवे। कूजितं रुतं दीर्घीकुर्व्वन् विस्तारयन्नित्यर्थः। यावद्वातं शब्दानुवृत्तेरिति भावः। एतेन प्रियतमः स्वचाटुवाक्यानुसारि क्रीड़ाकूजितमविच्छिन्नीकुर्वन्निति च गम्यते। स्फुटितानां विकसितानां कमलानामामोदेन परिमलेन सह या मैत्री संसर्गस्तेन कषायः सुरभिः। रागद्रव्ये कषायोऽस्त्री निर्यासे सौरभे रसइति यादवः। अन्यत्र विमर्दगन्धीत्यर्थः। विमर्द्दोत्थे परिमलोगन्धे जनमनोहरे। आमोदः सोऽतिनिर्हारीत्यमरः। अङ्गानुकूलोगात्रसुखस्पर्शः। अन्यत्र गाढालिङ्गनदत्तगात्रसंवाहन इत्यर्थः। भवम

यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः
शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः ॥३२॥
जालोद्गीर्णैरुपचितवपुः केशसंस्कारधूपै-
र्बन्धुप्रीत्या भवनशिखिभिर्दत्तनृत्योपहारः ।

तिना चोक्तमशिथिलपरिरम्भैर्दत्तसंवाहनानीति । संवाह्यन्ते च सुरतश्रान्ताः प्रियैः एतत्कविरेव वच्यति सम्भोगान्ते मम समुचितोहस्तसंवाहनानामिति। शिप्रा नाम काचित् तत्रत्या नदी तस्या वातः शिप्रावातः शिप्राग्रहणं शैत्यद्योतनार्थं प्रार्थना सुरतस्य याच्ञा तत्र चाटु करोति तथोक्तः पुनः सुरतार्थं प्रियवचनप्रयोक्तेत्यर्थः । कर्म्मण्यण् प्रत्ययः । प्रियतमोवल्लभइव स्त्रीणां सुरतग्लानिं सम्भोगखेदं हरति नुदति चाटूक्तिभिर्व्विस्मृतपूर्वरतिखेदाः स्त्रियः प्रियतमप्रार्थनां सफलयन्तीति भावः॥ ३२ ॥

जालोद्गीर्णैरिति । जालोद्गीर्णैर्गवाक्षमार्गनिर्गतैः । जालं गवाक्ष आनाये जालके कपटे गणे इति यादवः । केशसंस्कारधूपैर्वनिताकेशवासनार्थैर्गन्धद्रव्यधूपैरित्यर्थः । अत्र संस्कारधूपयोस्तादर्थ्येपि यूपदार्वादिवत्प्रकृतिविकाराभावादश्वघासादिवत् षष्ठीसमासो न चतुर्थीसमासः । उपचितवपुः परिपुष्टशरीरः । बन्धौ बन्धुरिति वा प्रीत्या भवनशिखिभिर्गृहमयूरै र्दत्तोनृत्यमेवोपहार

हर्म्येष्वस्याः कुसुमसुरभिष्वध्वखेदं नयेथाः
लक्ष्मीं पश्यन् ललितवनितापादरागाङ्कितेषु ॥ ३३ ॥
भर्त्तुः कण्ठच्छविरिति गणैः सादरं वीक्ष्यमाणः
पुण्यं यायास्त्रिभुवनगुरोर्धाम चण्डीश्वरस्य ।

उपायनं यस्मै स तथोक्तः । उपायनमुपग्राह्यमुपहारस्तथोपदेत्यमरः । कुसुमैः सुरभिषु सुगन्धिषु ललितवनिताः सुन्दरस्त्रियः । ललितं त्रिषु सुन्दरमिति शब्दार्णवः । तासां पादरागेण लाक्षारसेनाङ्कितेषु चिह्नितेषु हर्म्येषु धनिकभवनेषु अस्या उज्जयिन्याः लक्ष्मीं पश्यन् अध्वना अध्वगमनेन खेदं क्लेशं नयेथाः अपनय ॥ ३३ ॥

भर्त्तुरिति । भर्त्तुः स्वामिनो नीलकण्ठस्य भगवतः कण्ठस्येव छविर्यस्यासौ कण्ठच्छविरिति हेतोर्गणैः प्रमथैः । गणास्तु गणनायां स्यात् गणेशे प्रमथे चय इति शब्दार्णवः । सादरं यथा तथा वीक्ष्यमाणः सन् । प्रियवस्तुसादृश्यादतिप्रियं भवेदिति भावः । त्रयाणां भुवनानां समाहारस्त्रिभुवनं तद्धितार्थेत्यादिना समासः । तस्य गुरोश्चण्डीश्वरस्य कात्यायनीवल्लभस्य पुण्यं पावनं धाम महाकालाख्यं स्थानं यायाः गच्छ । विध्यर्थे लिङ् । श्रेयस्करत्वात्सर्वथा यातव्यमिति भावः । उक्तञ्च स्कान्दे । आकाशे तारकं लिङ्गं पाताले हाटकेश्वरम् ।

धूतोद्यानं कुवलयरजोगन्धिभिर्गन्धवत्या
स्तोयक्रीडानिरतयुवतिस्नानतिक्तैर्मरुद्भिः॥ ३४॥

अप्यन्यस्मिन् जलधर महाकालमासाद्य काले
स्थातव्यं ते नयनविषयं यावदत्येति भानुः।

मर्त्त्यलोके महाकालं दृष्ट्वा काममवाप्नुयादिति। न केवलं मुक्तिस्थानमिदं किन्तु विलासस्थानमपी त्याह धूतेति। कुवलयरजोगन्धिभिरुत्पलपराग गन्धवद्भिः तोयक्रीडासु निरतानामासक्तानां युव तीनां स्नानं स्नानीयं चन्दनादि करणे ल्युट्। स्ना नीयेऽभिषवे स्नानमिति यादवः। तेन तिक्तैः सुर भिभिः। कटुतिक्तकषायास्तु सौरभे च प्रकीर्त्तिता इति हलायुधः। सौगन्ध्यातिशयार्थं विशेषणद्वयम्। गन्धवत्या नाम नद्यास्तत्सम्बन्धिभिर्मारुतैर्धूतोद्यानं कम्पिताक्रीडमिति धाम्नो विशेषणम्॥ ३४॥

अपीति। हे जलधर महाकालं नाम पूर्व्वो क्तं चण्डीश्वरस्थानम् अन्यस्मिन् सन्ध्यातिरिक्तेऽपि काले आसाद्य प्राप्य ते तव स्थातव्यं त्वया स्थातव्य मित्यर्थः। कृत्यानां कर्त्तरि वेति षष्ठी। यावत् यावताकालेन भानुः सूर्य्यो नयनविषयं दृष्टिपथ मत्येति अतिक्रामति अस्तमयकालपर्य्यन्तं स्थात व्यमित्यर्थः। यावदित्येतदवधारणार्थे। यावत्ता वच्च साकल्येऽवधौ मानेऽवधारण इत्यमरः। किम

कुर्व्वन् सन्ध्याबलिपटहतां शूलिनः श्लाघनीया
मामन्द्राणां फलमविकलं लप्स्यसे गर्जितानाम्॥३५॥
पादन्यासैः क्वणितरशनास्तत्र लीलावधूतैः
रत्नच्छायाखचितवलिभिश्चामरैः क्लान्तहस्ताः।

र्थमत आह कुर्व्वन्निति। श्लाघनीयां प्रशंस्यां शूलिनः शिवस्य सन्ध्यायां वलिः पूजा तत्र पटहतां कुर्व्वन् सम्पादयन् आमन्द्राणामीषद्गम्भीराणां गर्ज्जितानामविकलमखण्डं फलं लप्स्यसे प्राप्स्यसि। लभेः कर्त्तरि लृट्। महाकालनाथवलिपटहत्वेन विनियोगात्ते गर्ज्जितसाफल्यं स्यादित्यर्थः॥ ३५॥

पादन्यासैरिति। तत्र सन्ध्याकाले पादन्यासैश्चरणनिक्षेपैः क्वणिताः शब्दायमाना रशना यासां तास्तथोक्ताः। क्वणतेरकर्म्मकत्वाद्गत्यर्थाकर्म्मकेत्यादिना कर्त्तरि क्तः। लीलया विलासेनावधूतैः कम्पितैः रत्नानां कङ्कणमणीनां छायया कान्त्या खचिता रूषिता वलयश्चामरदण्डा येषां तैः। वलिश्चामरदण्डे स्यात् जराविश्लथचर्म्मणीति विश्वः। चामरैर्वालव्यजनैः क्लान्तहस्ताः। एतेन दैशिकं नृत्यं सूचितम्। तदुक्तं नृत्यसर्वस्वे। खड्गकन्दुकवस्त्रादिदण्डिकाचामरस्रजः। वीणाञ्च धृत्वा यत्कुर्य्युर्नृत्यं तद्दैशिकं भवेदिति। वेश्याः महाकालनाथमुपेत्य नृत्यन्त्यो गणिकाः त्वत्तो नखपदेषु नखक्षतेषु सुखान् सुख

वेश्यास्त्वत्तो नखपदसुखान् प्राप्य वर्षाग्रविन्दू
नामोक्ष्यन्ते त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान् ॥ ३६ ॥
पश्चादुच्चैर्भुजतरुवनं मण्डलेनाभिलीनः
सान्ध्यं तेजः प्रतिनवजवापुष्परक्तं दधानः ।

करान्। सुखहेतौ सुखे सुखमिति शब्दार्णवः। वर्षस्याग्रविन्दून् प्राप्य त्वयि मधुकरश्रेणिदीर्घान् कटाक्षानपाङ्गानामोक्ष्यन्ते। परैरुपकृताः सन्तः सद्यः प्रत्युपकुर्व्वन्तीति भावः। कामिनीदर्शनीयत्व लक्षणं शिवोपासनाफलं सद्यो लप्स्यस इति ध्वनिः ॥ ३६ ॥

पश्चादिति। पश्चात् सन्ध्यावल्यनन्तरं पशुपतेः शिवस्य नृत्यारम्भे ताण्डवप्रारम्भे प्रतिनवजवापुष्परक्तं प्रत्यग्रजवाकुसुमारुणं सन्ध्यायां भवं सान्ध्यं तेजो दधानः उच्चैरुन्नतं भुजा एव तरवस्तेषां वनं मण्डलेन मण्डलाकारेणाभिलीनः अभिव्याप्तः सन्। कर्त्तरि क्तः। भवान्या भवपत्न्या। इन्द्रवरुणभवशर्व्वेति ङीष् आनुगागमश्च। शान्तः उद्वेगोगजाजिनदर्शनभयं ययोस्ते अतएव स्तिमिते निश्चले नयने यस्मिन् कर्म्मणि तत् तथोक्तम्। उद्वेगस्त्वरिते क्लेशे भये मन्थरगामिनीति शब्दार्णवे। भक्तिः पूज्येष्वनुरागः। भावार्थे क्तिन् प्रत्ययः। दृष्टा भक्तिर्यस्य स दृष्टभक्तिः सन् पशुपते आर्द्रं शोणितार्द्रं यन्नागाजिनं गजचर्म्म। अजिनं चर्म्म कृत्तिः स्त्रीत्

नृत्यारम्भे हर पशुपतेरार्द्रनागाजिनेच्छां
शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्या ॥ ३७ ॥
गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं
रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः ।

मरः । तत्रेच्छां हर निवर्त्तय त्वमेव तत्स्थाने भवे त्यर्थः । गजासुरमर्द्दनानन्तरं भगवान् महादेव स्तदीयमार्द्राजिनं भुजमण्डलेन बिभ्रत्ताण्डवं चका रेति प्रसिद्धिः ॥ ३७ ॥

इत्थं महाकालनाथस्य सेवाप्रकारमभिधाय पुनरपि नगरसञ्चारप्रकारमाह

गच्छन्तीति । तत्रोज्जयिन्यां नक्तं रात्रौ रमण वसतिं प्रियभवनं प्रति गच्छन्तीनां योषितामभिसा रिकाणामित्यर्थः । सूचिभिः भेद्यैरतिसान्द्रैरित्यर्थः । तमोभिः रुद्धालोके निरुद्धदृष्टिप्रसरे नरपतिपथे राजमार्गे कनकस्य निकषः निकष्यत इति व्युत्पत्त्या निकषोपलरेखा तस्येव स्निग्धं तेजो यस्यास्तया । स्निग्धन्तु मसृणे सान्द्रे रम्ये क्लीवे च तेजसीति शा श्वताणवे । सुदाम्नाद्रिणा एकदिक् सौदामनी विद्यु त् । तेनैकदिगित्यण् प्रत्ययः । तथा उर्व्वीं मार्गं दर्शय । किञ्च तोयोत्सर्गस्तनिताभ्यां वृष्टिगर्ज्जिताभ्यां मुखरः शब्दायमानो मास्म भूः कुतस्ता यो षितो विक्लवा भीरवः ततो वृष्टिगर्ज्जिते न कार्य्ये

सौदामन्या कनकनिकषस्निग्धया दर्शयोर्व्वीं
तोयोत्सर्गस्तनितमुखरो मास्म भूर्विक्लवास्ताः॥ ३८ ॥

तां कस्याञ्चिद्भवनवलभौ सुप्तपारावतायां
नीत्वा रात्रिं चिरविलसनात् खिन्नविद्युत्कलत्रः।
दृष्टे सूर्य्ये पुनरपि भवान् वाहयेदध्वशेषं
मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः॥ ३९ ॥

इत्यर्थः। अत्र तोयोत्सर्गसहितं स्तनितमिति विग्रहः विशिष्टस्यैव केवलस्तनितस्याप्यनिष्टत्वात्। नच द्वन्द्वपक्षे अल्पाच्तरपूर्व्वनिपातशास्त्रविरोधः लक्षणहेत्वोः क्रियाया इत्यत्र सूत्र एव विपरीतनिर्द्देशेन पूर्व्वनिपातशास्त्रस्यानित्यत्वज्ञापनादिति॥ ३८ ॥

तामिति। चिरं विलसनात् स्फुरणात् खिन्नं विद्युदेव कलत्रं यस्य स भवान् सुप्ताः पारावताः कलरवा यस्यां विविक्तायामित्यर्थः। पारावतः कलरवः कपोत इत्यमरः। जनसञ्चारस्तत्रासम्भावित एवेति भावः कस्याञ्चिद्भवनवलभौ गृहाच्छादनोपरिभाग इत्यर्थः। आच्छादनं स्याद्वलभी गृहाणामिति हलायुधः। तां रात्रिं नीत्वा दृष्टे सूर्य्ये सति दिने सतीत्यर्थः। पुनरप्यध्वशेषं वाहयेत्। तथाहि सुहृदां मित्राणामभ्युपेता अङ्गीकृता अर्थस्य प्रयोजनस्य कृत्या क्रिया यैस्ते अभ्युपेतसुहृदर्था इत्यर्थः। सापेक्षत्वेपि गमकत्वात्समासः। कृत्या क्रियादेवतयोः कार्य्ये

तस्मिन् काले नयनसलिलं योषितां खण्डितानां
शान्तिं नेयं प्रणयिभिरतो वर्त्म भानोस्त्यजाशु ।
प्रालेयास्रं कमलवदनात्सोऽपि हर्त्तुं नलिन्याः
प्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पाभ्यसूयः ॥ ४० ॥

स्त्रीति यादवः । न मन्दायन्ते खलु न मन्दा भवन्ति हि न विलम्बन्त इत्यर्थः । लोहितादिडाज्भ्यः क्यष् इति क्यष् । वा क्यष इत्यात्मनेपदम् ॥ ३९ ॥

तस्मिन्निति । तस्मिन् काले पूर्व्वोक्ते सूर्य्योदयकाले प्रणयिभिः प्रियतमैः खण्डितानां योषितां नायिकाविशेषाणाम् । ज्ञातेऽन्यासङ्गविकृते खण्डितेर्ष्याकषायितेति दशरूपके । नयनसलिलं शान्तिं नेयं नेतव्यम् । नयतिर्द्विकर्म्मकः । अतो हेतोः भानोर्वर्त्म आशु शीघ्रं त्यज तस्यावरको माभूरित्यर्थः । विपक्षे अनिष्टमाचष्टे सोऽपि भानुः नलिनान्यम्बुजानि यस्याः सन्तीति नलिनी पद्मिनी तस्याः स्वकान्तायाः कमलं स्वकुसुममेव वदनं यस्मात् प्रालेयं हिममेवास्रमश्रु हर्त्तुं शमयितुं प्रत्यावृत्तः प्रत्यागतः । नलिन्यास्तु भर्त्तुर्भानोर्देशान्तरगमनात् खण्डितात्वमित्याशयः । ततस्त्वयि करान् रश्मीन् रुणद्धीति कररुत् । क्विप् । तस्मिन् कररुधि सति हस्तरोधिनि सतीति च गम्यते । बलिहस्तांशवः करा इत्यमरः । अनल्पाभ्यसूयोऽधिकविद्वेषः स्यात् ।

गम्भीरायाः पयसि सरितश्चेतसीव प्रसन्ने
छायात्मापि प्रकृतिसुभगो लप्स्यते ते प्रवेशम्।
तस्मादस्याः कुमुदविशदान्यर्हसि त्वं न धैर्य्या
न्मोघीकर्त्तुं चटुलशफरोद्वर्त्तनप्रेक्षितानि॥ ४१ ॥

प्रायेणेच्छाविशेषविघातात् रोषोद्वेषश्च कामिनां भवतीति भावः। किञ्च आत्मानं चार्कमीशानं विष्णुं वा द्वेष्टि योजनः। श्रेयांसि तस्य नश्यन्ति रौरवञ्च भवेत् ध्रुवमिति निषेधात्कार्य्यहानिर्भविष्यतीति ध्वनिः॥ ४०॥

गम्भीराया इति। गम्भीरा नाम सरित् उदारा नयिका च ध्वन्यते। तस्याः प्रसन्नेऽनुरक्तत्वाद्दोषरहिते चेतसीव प्रसन्नेऽतिनिर्म्मले पयसि प्रकृत्या स्वभावेनैव सुभगः सुन्दरः। सुन्दरेऽधिकभाग्ये च दुर्हिनेतरवासरे तुरीयांशे श्रीमति च सुभग इति शब्दार्णवे। ते तव छाया चासावात्मा च सोऽपि प्रतिबिम्बशरीरञ्च प्रवेशं लप्स्यते अपिशब्दात् प्रवेशमनिच्छोरपीति भावः। तस्मात् छायाद्वारापि प्रवेशावश्यम्भावित्वात् अस्या गम्भीरायाः कुमुदवद्विशदानि धवलानि चटुलानि शीघ्राणि शफराणां मीनानामुद्वर्त्तनानि उल्लुण्ठनान्येव प्रेक्षितान्यवलोकनानि। त्रिषु स्याच्चटुलं शीघ्रमिति विश्वः। एतावदेव गम्भीराया अनुरागलिङ्गम्।

तस्याः किञ्चित्करधृतमिव प्राप्तवानीरशाखं
नीत्वा नीलं सलिलवसनं मुक्तरोधोनितम्बम्।
प्रस्थानं ते कथमपि सखे लम्बमानस्य भावि
ज्ञातास्वादो विवृतजघनां को विहातुं समर्थः॥ ४२॥

धैर्य्याद्वाष्णर्याद्दैमत्यादिति यावत् मोघीकर्त्तुं विफलीकर्त्तुं नार्हसि नानुरक्ता विप्रलब्धव्येत्यर्थ॥ ४१॥

तस्या इति। हे सखे प्राप्ता वानीरशाखा वेतसशाखा येन तत्तथोक्तम् अतएव किञ्चिदीषत्करधृतं हस्तावलम्बितमिव स्थितं मुक्तस्त्यक्तो रोधस्तटमेव नितम्बः कटको येन तत्तथोक्तम्। नितम्बः पश्चिमे श्रोणिभागेऽद्रिकटके कटाविति यादवः। नीलं कृष्णवर्णं तस्या गम्भीरायाः सलिलमेव वसनं नीत्वा अपनीय। प्रस्थानसमये प्रेयसीवसनग्रहणं विरहतापविनोदनार्थमिति प्रसिद्धम्। लम्बमानस्य पीतसलिलभराल्लम्बमानस्य अन्यत्र जघनारूढस्य ते तव प्रस्थानं प्रयाणं कथमपि कृच्छ्रेण भावि। कृच्छ्रत्वे हेतुमाह ज्ञातेति। ज्ञातास्वादोऽनुभूतरसः कः पुमान् विवृतं प्रकटीकृतं जघनं कटिस्तत्पूर्व्वभागो वा यस्यास्ताम्। जघनं स्यात् कटौ पूर्व्व श्रोणिभागापरांशयोरिति यादवः। विहातुं त्यक्तुं समर्थः न कापीत्यर्थः॥ ४२॥

त्वदिति। त्वन्निष्यन्देन तव वृष्ट्या उच्छ्वसि

त्वन्निष्यन्दोच्छ्वसितवसुधागन्धसम्पर्करम्यः
स्रोतोरन्ध्रध्वनितसुभगं दन्तिभिः पीयमानः।
नीचैर्वास्यत्युपजिगमिषोर्देवपूर्वं गिरिं ते
शीतो वायुः परिणमयिता काननोदुम्बराणाम् ॥४२॥

ताया उपबृंहिताया वसुधाया भूमेः गन्धस्य सम्पर्केण रम्यः सुरभिरित्यर्थः। स्रोतःशब्देनेन्द्रियवाचिना तद्विशेषो घ्राणं लक्ष्यते। स्रोतोम्बु वेगेन्द्रिययो रित्यमरः। स्रोतोरन्ध्रेषु नासाग्रकुहरेषु यत् ध्वनितं शब्दस्तेन सुभगं यथा तथा दन्तिभिः गजैः पीयमानो वसुधागन्धलोभादाघ्रायमाणइ त्यर्थः। अनेन मान्द्यमुच्यते। काननेषु वनेषु उदुम्बराणां जन्तुफलानाम्। उदुम्बरे जन्तु फलो यज्ञाङ्गो हेमदुग्धकइत्यमरः। परिणम यिता परिपाकयिता। मितां ह्रस्व इति ह्रस्वः। शीतो वायुः देवपूर्व्वं देवशब्दपूर्व्वं गिरिं देवगि रिमित्यर्थः। उपजिगमिषोरुपगन्तुमिच्छोः। गमेः सनन्तादुप्रत्ययः। ते तव नीचैः शनैर्वास्यति त्वां वी जयिष्यतीत्यर्थः। सम्बन्धमात्रविवक्षायां षष्ठी। देव पूर्वं गिरिमित्यत्र देवपूर्व्वत्वं गिरिशब्दस्य नतु सं ज्ञिनस्तदर्थस्येति संज्ञायाः संज्ञित्वाभावादवाच्यव चनं दोषमाहुरालङ्कारिकाः। तदुक्तमेकावल्याम्। यदवाच्यस्य वचनं स्यात्तदवाच्यवचनं ग्रथितमिति।

तत्र स्कन्दं नियतवसतिं पुष्पमेघीकृतात्मा
पुष्पासारैः स्नपयतु भवान् व्योमगङ्गाजलार्द्रैः ।
रक्षाहेतोर्नवशशिभृता वासवीनां चमूना
मत्यादित्यं हुतवहमुखे सम्भृतं तद्धि तेजः ॥ ४४ ॥

समाधानन्तु देवशब्दविशेषितेन गिरिशब्देन शब्द परेण मेघोपगमयोग्योदेवगिरिरुच्यते इति कथञ्चित् सम्पाद्यम् ॥ ४३ ॥

तत्रेति । तत्र देवगिरौ नियता वसतिर्य्यस्य तं नित्यसन्निहितमित्यर्थः । पुरा किल तारकाख्यासुरविजयसन्तुष्टसुरप्रार्थनावशाद्भगवान् भवानीनन्दनः स्कन्दो नित्यमहमिह सह शिवाभ्यां वसामीत्युक्त्वा तत्र वसतीति प्रसिद्धिः । स्कन्दं कुमारं स्वामिनं पुष्पाणां मेघः पुष्पमेघः पुष्पमेघीकृतात्मा कामरूपत्वात् पुष्पवर्षुकमेघीकृतविग्रहः सन् व्योमगङ्गाजलार्द्रैः पुष्पासारैः पुष्पसम्पातैः । धारासम्पात आसार इत्यमरः । भवान् स्वयमेव स्नपयतु अभिषिञ्चतु स्वयं पूजायाः उत्तमत्वादिति भावः । तथाच शम्भुरहस्ये । स्वयं यजति चेद्देवमुत्तमा सोदरात्मजैः । मध्यमा याजयेद्भृत्यैरधमा याजनक्रियेति । स्कन्दस्य पूज्यत्वसमर्थनेनार्थेनार्थान्तरं न्यस्यति रक्षेति । तत् भगवान् स्कन्द इत्यर्थः विधेयप्राधान्यान्नपुंसकनिर्देशः ।

त्वय्यादातुं जलमवनते शार्ङ्गिणो वर्णचौरे
तस्याः सिन्धोः पृथुमपि तनुं दूरभावात्प्रवाहम्।

शरवणम्। प्रनिरन्तःशरेत्यादिना णत्वम्। तत्र भवो जन्म यस्य तं शरवणभवम्। अवर्ज्यो बहुव्रीहिर्व्यधिकरणोजन्माद्युत्तरपद इति वामनः। अवर्ज्यः अगतिकत्वादाश्रयणीय इत्यर्थः। देवं स्कन्दम्। आराध्य उपास्य वीणिभिर्वीणावद्भिः। व्रीह्यादित्वादिनिः। सिद्धद्वन्द्वैः सिद्धमिथुनैः भगवन्तं स्कन्दमुपवीणयितुमागतैरिति भावः। जलकणभयात् जलसेकस्य वीणाक्वणनप्रतिबन्धकत्वादिति भावः। मुक्तमार्गस्त्यक्तवर्त्मा सन् उल्लङ्घिताध्वा क्रियन्तमध्वानं गत इत्यर्थः। सुरभितनयानां गवामालम्भेन संज्ञपनेन जायते इति तथोक्तां भुवि लोके स्रोतोमूर्त्त्या प्रवाहरूपेण परिणतां रूपविशेषमापन्नां रन्तिदेवस्य दशपुरपतेर्महाराजस्य कीर्त्तिं चर्म्मण्वत्याख्यां नदीमित्यर्थः। मानयिष्यन् सत्करिष्यन् व्यालम्बेथाः आलम्बप्रावतरेरित्यर्थः। पुरा किल राज्ञो रन्तिदेवस्य गवालम्भेष्वेकत्र सम्भृताद्रक्तनिष्यन्दाच्चर्म्मराशेः काचिन्नदी सस्यन्दे सा चर्म्मण्वतीति ख्यायत इति॥ ४६॥

त्वयीति। शार्ङ्गिणः कृष्णस्य वर्णस्य कान्तेश्चौरे वर्णचौरे तत्तुल्यवर्णे इत्यर्थः। त्वयि जलमादातुमव-

प्रेचिष्यन्ते गगनगतयो नूनमावर्ज्य दृष्टी
रेकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम् ॥ ४७ ॥
तामुत्तीर्य्य व्रज परिचितभ्रूलताविभ्रमाणां
पक्ष्मोत्क्षेपादुपरिविलसत्कृष्णशारप्रभाणाम् ।
कुन्दक्षेपानुगमधुकरश्रीमुषामात्मबिम्बं
पात्रीकुर्व्वन् दशपुरवधूनेत्रकौतूहलानाम् ॥ ४८ ॥

नते सति पृथुमपि दूरभावात् दूरत्वात्तनुं सूक्ष्मतया प्रतीयमानं तस्याः सिन्धोश्चर्म्मण्वत्याख्यायाःप्रवाहं गगने गतिर्येषां ते गगनगतयः खेचराः सिद्धगन्धर्व्वादयः । अयमपि बहुव्रीहिः पूर्व्ववत् जन्माद्युत्तरपदेषु द्रष्टव्यः । नूनं सत्यं दृष्टीरावर्ज्य नियम्य एकम् एकयष्टिकं स्थूलो महान् मध्यो मध्यमणीभूत इन्द्रनीलो यस्य तं भुवो भूमेः मुक्तागुणं मुक्ताहारमिव प्रेचिष्यन्ते । अत्रात्यन्त नीलमेघसङ्गतस्य प्रवाहस्य भूकण्ठमुक्तागुणत्वेनोत्प्रेक्षणादुत्प्रेक्षैवेयमिति इव शब्देन व्यज्यते । निरुक्तकारस्तु तत्र तत्रोपमा यत्र इवशब्दस्य दर्शनमितीवशब्ददर्शनादत्राप्युपमैवेति बभ्राम ॥ ४७ ॥

तामिति । तां चर्म्मण्वतीमुत्तीर्य्य भ्रुवो लताइव भ्रूलता उपमित समासः । तासां विभ्रमा विलासाः परिचिताः क्षुण्णा येषु तेषां पक्ष्माणि नेत्रलोमानि । पक्ष्म सूत्रे च सूक्ष्मांशे किञ्जल्के नेत्रलोमनीति शाश्वतः । तेषामुत्क्षेपादुन्नमनाद्धेतोः कृष्णाश्च ताः शा

त्वय्यादातुं जलमवनते शार्ङ्गिणो वर्णचौरे
तस्याः सिन्धोः पृथुमपि तनुं दूरभावात्प्रवाहम्।

शरवणम्। प्रलिरन्तःशरेत्यादिना णत्वम्। तत्र भवो जन्म यस्य तं शरवणभवम्। अवर्ज्यो बहुव्रीहिर्व्यधिकरणोजन्माद्युत्तरपद इति वामनः। अवर्ज्यः अगतिकत्वादाश्रयणीय इत्यर्थः। देवं स्कन्दम्। आराध्य उपास्य वीणिभिर्वीणावद्भिः। व्रीह्यादित्वादिनिः। सिद्धद्वन्द्वैः सिद्धमिथुनैः भगवन्तं स्कन्दमुपवीणयितुमागतैरिति भावः। जलकणभयात् जलसेकस्य वीणाक्वणनप्रतिबन्धकत्वादिति भावः। मुक्तमार्गस्त्यक्तवर्त्मा सन् उल्लङ्घिताध्वा क्रियन्तमध्वानं गत इत्यर्थः। सुरभितनयानां गवामालम्भेन संज्ञपनेन जायते इति तथोक्तां भुवि लोके स्रोतोमूर्त्त्या प्रवाहरूपेण परिणतां रूपविशेषमापन्नां रन्तिदेवस्य दशपुरपतेर्महाराजस्य कीर्त्तिं चर्म्मण्वत्याख्यां नदीमित्यर्थः। मानयिष्यन् सत्करिष्यन् व्यालम्बेथाः आलम्ब्यावतरेरित्यर्थः। पुरा किल राज्ञो रन्तिदेवस्य गवालम्भेष्वेकत्र सम्भृताद्रक्तनिष्यन्दाच्चर्म्मराशेः काचिन्नदी सस्यन्दे सा चर्म्मण्वतीति ख्यायत इति॥ ४६॥

त्वयीति। शार्ङ्गिणः कृष्णस्य वर्णस्य कान्तेश्चौरे वर्णचौरे तत्तुल्यवर्णे इत्यर्थः। त्वयि जलमादातुमव-

प्रेक्षिष्यन्ते गगनगतयो नूनमावर्ज्य दृष्टी
रेकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम्॥ ४७॥
तामुत्तीर्य्य व्रज परिचितभ्रूलताविभ्रमाणां
पक्ष्मोत्क्षेपादुपरिविलसत्कृष्णशारप्रभाणाम्।
कुन्दक्षेपानुगमधुकरश्रीमुषामात्मविम्बं
पात्रीकुर्व्वन् दशपुरवधूनेत्रकौतूहलानाम्॥ ४८॥

नते सति दृष्टुमपि दूरभावात् दूरत्वात्तनुं सूक्ष्मतया प्रतीयमानं तस्याः सिन्धोश्चर्म्मण्वत्याख्यायाःप्रवाहं गगने गतिर्येषां ते गगनगतयः खेचराः सिद्धगन्धर्वादयः। अयमपि बहुब्रीहिः पूर्व्ववत् जन्माद्युत्तरपदेषु द्रष्टव्यः। नूनं सत्यं दृष्टीरावर्ज्य नियम्य एकम् एकयष्टिकं स्थूलो महान् मध्यो मध्यमणीभूत इन्द्रनीलो यस्य तं भुवो भूमेः मुक्तागुणं मुक्ताहारमिव प्रेक्षिष्यन्ते। अत्रात्यन्त नीलमेघसङ्गतस्य प्रवाहस्य भूकण्ठमुक्तागुणत्वेनोत्प्रेक्षणादुत्प्रेक्षैवेयमिति इव शब्देन व्यज्यते। निरुक्तकारस्तु तत्र तत्रोपमा यत्र इवशब्दस्य दर्शनमितीवशब्ददर्शनादत्राप्युपमैवेति बभ्राम॥४७॥

तामिति। तां चर्म्मण्वतीमुत्तीर्य्य भ्रुवो लताइव भ्रूलता उपमित समासः। तासां विभ्रमा विलासाः परिचिताः क्षुण्णा येषु तेषां पक्ष्माणि नेत्रलोमानि। पक्ष्म सूत्रे च सूक्ष्मांशे किञ्जल्के नेत्रलोमनीति शाश्वतः। तेषामुत्क्षेपादुन्नमनाद्धेतोः कृष्णाश्च ताः शा

ब्रह्मावर्त्तं जनपदमथ च्छायया गाहमानः
क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद्भजेथाः ।
राजन्यानां शितशरशतैर्यत्र गाण्डीवधन्वा
धारापातैस्त्वमिव कमलान्यभ्यवर्षन्मुखानि ॥ ४९ ॥

राश्च कृष्णशाराः नीलशाराः। वर्णोवर्णेनेति समासः। कृष्णरक्तसिताः शारा इति यादवः। ततश्च शारश ब्दादेव सिद्धे कार्ष्ण्ये पुनः कृष्णपदोपादानं कार्ष्ण्यप्र धान्यार्थम्। उपरि विलसन्त्यः कृष्णशाराः प्रभाः येषां तेषां कुन्दानि माघ्यकुसुमानि तेषां क्षेप इतस्ततश्चालनं तस्यानुगाः अनुसारिणो ये मधुक रास्तेषां श्रियं मुष्णन्तीति तथोक्तानां क्षिप्यमाणकु न्दानुधावि मधुकरकल्पानामित्यर्थः। दशपुरं रन्तिदेवस्य नगरं तस्य वध्वः स्त्रियः। वधूर्जाया स्नुषा स्त्रीचेत्यमरः। तासां नेत्रकौतूहलानां नेत्रा भिलाषाणां साभिलाषदृष्टीनामित्यर्थः। आत्म विम्बं स्वमूर्त्तिं पात्रीकुर्व्वन् विषयीकुर्व्वन् व्रज गच्छ ॥ ४८॥

ब्रह्मावर्त्तमिति। अथ अनन्तरं ब्रह्मावर्त्तं नाम जनपदं देशं. अत्र मनुः। सरस्वतीदृषद्वत्यो र्देवनद्योर्यदन्तरम्। तं देवनिर्म्मितं देशं ब्रह्मा वर्त्तं प्रचक्षत इति। छाययानातपमण्डलेन गाह मानः प्रविशन् नतु स्वरूपेण। पीठक्षेत्राश्रमा.

हित्वा हालामभिमतरसां रेवतीलोचनाङ्कां
बन्धुप्रीत्या समरविमुखो लाङ्गली याः सिषेवे।
कृत्वा तासामभिगममपां सौम्य सारस्वतीना
मन्तःशुद्धस्त्वमपि भविता वर्णमात्रेण कृष्णः॥ ५०॥

दीनि परिहृत्यान्यतो व्रजेदिति वचनात्। क्षत्रप्रधनपिशुनम् अद्यापि शिरः कपालादिमत्तया कुरुपाण्डव युद्धसूचकमित्यर्थः। युद्धमायोधनं जन्यं प्रधनं प्रविदारणमित्यमरः। तत्प्रसिद्धं कुरूणामिदं कौरवं क्षेत्रं भजेथाः कुरुक्षेत्रं व्रजेत्यर्थः। यत्र कुरुक्षेत्रे गाण्डी अस्यास्तीति गाण्डीवं धनुर्विशेषः। गाण्डजगात्संज्ञायामिति मत्वर्थीयोवप्रत्ययः। कपिध्वजस्य गाण्डीवगाण्डिवौ पुंनपुंसकावित्यमरः। तद्धनुर्यस्य स गाण्डीवधन्वा अर्ज्जुनः। वा संज्ञायामित्यनङादेशः। शितशरशतैः निशितवाणसहस्रैः राजन्यानां राज्ञां मुखानि धाराणामुदकधाराणां पातैः कमलानि त्वमिवाभ्यवर्षदभिमुखं दृष्टवान् शरवर्षेण शिरांसि चिच्छेदेत्यर्थः॥ ४९॥

हित्वेति। बन्धुप्रीत्या कुरुपाण्डवस्नेहेन नतु भयेन समरविमुखो युद्धनिस्पृहः लाङ्गलमस्यास्तीति लाङ्गली हलधरः अभिमतरसामभीष्टस्वादां तथा रेवत्याः स्वप्रियाया लोचने एवाङ्कः प्रतिविम्बितत्वा चिह्नं यस्यास्तां हालां सुराम्। सुरा हलिप्रिया हाले

तस्माद्गच्छेरनुकनखलं शैलराजावतीर्णां
जह्नोः कन्यां सगरतनयस्वर्गसोपानपङ्क्तिम्।
गौरीवक्त्रभ्रुकुटिरचनां या विहस्येव फेनैः
शम्भोः केशग्रहणमकरोदिन्दुलग्नोर्म्मिहस्ता ॥ ५१ ॥

त्यमरः। अभिप्रयुक्तं देशभाषापदमित्यत्र सूत्रे हालेति देशभाषापदमप्यतीव कविप्रयोगात्साध्वि त्युदाजहार वामनः। हित्वा त्यक्त्वा दुस्त्यजामपीति भावः। याः सारस्वतीरपः सिषेवे। हे सौम्य सुभग त्वं तासां सरस्वत्या नद्या इमाः सारस्वत्यस्तासाम भिगमं सेवां कृत्वा अन्तःअन्तरात्मनि शुद्धो निर्म्मलो निर्द्दोषो भविता। अपि सद्य एव पूतोभविष्यसी त्यर्थः। वर्त्तमानसामीप्ये वर्त्तमानवद्वेति वर्त्तमानप्र त्ययः। वर्णमात्रेण वर्णेनैव कृष्णः श्यामः नतु पापे नेत्यर्थः अन्तःशुद्धिरेव सम्पाद्या नतु बाह्या वहिःशु द्धोऽपि सूतवधप्रायश्चित्तार्थं सारस्वतसलिलसेवी तत्र भगवान् बलभद्रएव निदर्शनम्। अतो भवतापि सरस्वती सर्व्वथा सेवितव्येति भावः॥ ५०॥

तस्मादिति। तस्मात् कुरुक्षेत्रात् कनखलस्याद्रेः समीपे अनुकनखलम्। अनुर्यत्समयेत्यव्ययीभावः। शैलराजाद्धिमवतोऽवतीर्णां सगरतनयानां स्वर्गसो पानपङ्क्तिं स्वर्गप्राप्तिसाधनभूतामित्यर्थः जह्नोर्नाम राज्ञः कन्यां जाह्नवीं गच्छेर्गच्छ। विध्यर्थे लिङ्।

तस्याः पातुं सुरगज इव व्योम्नि पश्चार्द्धलम्बी
त्वञ्चेदच्छस्फटिकविशदं तर्कयेस्तिर्य्यगम्भः।
संसर्पन्त्या सपदि भवतः स्रोतसि च्छाययासौ
स्यादस्थानोपगतयमुनासङ्गमेवाभिरामा॥ ५२॥

या जाह्नवी गौर्य्यो वक्त्रे या भ्रुकुटिरचना सापत्न्यरोषात् भ्रुभङ्गकरणं तां फेनैर्विहस्य अवहस्येव धावल्यात् फेनानां हासत्वेनोत्प्रेक्षा। इन्दौ शिरोमाणिक्यभूते लग्ना ऊर्म्मय एव हस्ता यस्याः सा इन्दुलग्नोर्म्मिहस्ता सती शम्भोःकेशग्रहणमकरोत्।.यथा काचित्प्रौढ़ा नायिका सपत्नीमसहमाना स्वभर्त्तारं सह शिरोरत्नेन केशेष्वाकर्षति तद्वदिति भावः। इदञ्च पुरा किल भगीरथप्रार्थनया भगवतीं गगनपथात्पतन्तीं गङ्गां गङ्गाधरो जटाजूटेन जग्राहेति कथामुपजीव्योक्तम्॥ ५१॥

तस्या इति। सुरगज इव कश्चिद्दिग्गज इव व्योम्नि पश्चादर्द्धं पश्चार्द्धम्। पृषोदरादित्वात् साधुः। तेन लम्बत इति पश्चार्द्धलम्बी सन् पश्चार्द्धभागेन व्योम्नि स्थित्वा पूर्व्वार्द्धेन जलोन्मुख इत्यर्थः। केचित् पूर्व्वार्द्धलम्बीति पठन्ति। अच्छस्फटिकविशदं निर्म्मलस्फटिकावदातं तस्या गङ्गाया अम्भस्तिर्य्यक् तिरश्चीनं यथा तथा पातुं त्वं तर्कयेर्विचारयेश्चेत्। सपदि स्रोतसि प्रवाहे संसर्पन्त्या संक्रामन्त्या

आसीनानां सुरभितशिलं नाभिगन्धैर्मृगाणां
तस्या एव प्रभवमचलं प्राप्य गौरं तुषारैः ।
वक्ष्यस्यध्वश्रमविनयने तस्य शृङ्गे निषण्णः
शोभां शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयाम् ॥ ५३ ॥

भवतः छायया प्रतिबिम्बेनासौ गङ्गा अस्थाने प्रयागादन्यत्र उपगतः प्राप्तोयमुना सङ्गमो यया सा तथाभूतेवाभिरामा स्यात् ॥ ५२ ॥

आसीनानामिति । आसीनानामुपविष्टानां मृगाणां कस्तूरिका मृगाणाम् । अन्यथा नाभिगन्धानुपपत्तेः । नाभिगन्धैः कस्तूरीगन्धैः तेषां तदुद्भवत्वादतएव मृगनाभिसंज्ञा च । मृगनाभिर्मृगमदः कस्तूरीत्यमरः । अथवा नाभयः कस्तूर्य्यः । नाभिः प्रधाने कस्तूर्य्यां मदे च क्वचिदीरित इति विश्वः । तासां गन्धैः सुरभिताः सुरभिकृताः शिला यस्य स तं तस्या गङ्गायाएव प्रभवत्यस्मादिति प्रभवः कारणं तुषारैर्गौरं सितम् । अवदातः सितो गौर इत्यमरः । अचलं प्राप्य विनीयतेऽनेनेति विनयनं करणे ल्युट् । अध्वश्रमस्य विनयने अपनोदके तस्य हिमाद्रेः शृङ्गे निषण्णः सन् शुभ्रोयस्त्रिनयनस्य त्र्यम्बकस्य वृषो वृषभः । सुकृते वृषभे वृष इत्यमरः । तेनोत्खातेन विदारितेन पङ्केन सह उपमेयामुपमातुमर्हां शोभां वक्ष्यसि वोढासि । वह

तञ्चेद्वायौ सरति सरलस्कन्धसङ्घट्टजन्मा
बाधेतोल्काक्षपितचमरीवालभारो दवाग्निः ।
अर्हस्येनं शमयितुमलं वारिधारासहस्रै
रापन्नार्त्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम् ॥५४॥

तेर्ल्लट् । विनयनेत्यत्र पूर्व्वपदात्संज्ञायामग इति णत्वं न भवति । क्षुभ्नादिषु चेति निषेधात् । तस्याः प्रभवमित्यादिना हिमाद्रौ मेघस्य वैवाहिको गृह विहारो ध्वन्यते ॥ ५३ ॥

तमिति । वायौ वनवाते सरति वाति सति सरलानां देवदारुद्रुमाणां स्कन्धाः प्रदेशविशेषाः । अस्त्री प्रकाण्डः स्कन्धः स्यान्मूलाच्छाखावधेस्तरोरित्यमरः । तेषां सङ्घट्टनेन सङ्घर्षणेन जन्म यस्य स तथोक्तः । जन्मोत्तरपदत्वाद्व्यधिकरणोपि बहुव्रीहिः साधुरित्युक्तम् । उल्काभिः स्फुलिङ्गैः क्षपिंता निर्द्दग्धाश्चमरीणां बालभाराः केशसमूहायेन दव एवाग्निर्दवाग्निर्वनवह्निः । वने च वनवह्नौ च दवोदाव इवेष्यत इति यादवः । तं हिमाद्रिं बाधेत चेत् पीड़येद्यदि एनं दवाग्निं वारिधारासहस्रैः शमयितुमर्हसि । युक्तञ्चैतदित्याह उत्तमानां महतां सम्पदः समृद्धयः आपन्नानामार्त्तानामार्त्तिप्रशमनमापन्निवारणमेव फलं प्रयोजनं यासां तास्तथोक्ता

ये संरम्भोत्पतनरभसाः स्वाङ्गभङ्गाय तस्मिन्
मुक्ताध्वानं सपदि शरभा लङ्घयेयुर्भवन्तम् ।
तान् कुर्वीथास्तुमुलकरकावृष्टिपातावकीर्णान्
के वा न स्युः परिभवपदं निष्फलारम्भयत्नाः ॥ ५५ ॥

हि अतो हिमाचलस्य दावानलस्त्वया शमयितव्य इति भावः ॥ ५४ ॥

य इति । तस्मिन् हिमाद्रौ संरम्भः कोपः । संरम्भः संक्रमे कोप इति शब्दार्णवः । तेनोत्पतने उत्प्लवने रभसो वेगो येषां ते तथोक्ताः । रभसो वेगहर्षयोरित्यमरः । ये शरभा अष्टापदमृगविशेषाः । शरभः शलभे चाष्टापदे प्रोक्तो मृगान्तर इति विश्वः । मुक्तोऽध्वा शरभोत्प्लवनमार्गो येन तं भवन्तं सपदि स्वाङ्गभङ्गाय लङ्घयेयुः । सम्भावनायां लिङ् । भवतोऽतिदूरत्वात् स्वाङ्गभङ्गातिरिक्तं फलं नास्ति लङ्घनस्येत्यर्थः । तान् शरभान् तुमुलाः सङ्कुलाः करकाः वर्षोपलाः । वर्षोपलस्तु करकेत्यमरः। तासां वृष्टिस्तस्याःपातेनावकीर्णान् विक्षिप्तान् कुर्वीथाः कुरुष्व । विध्यर्थे लिङ् । क्षुद्रोऽप्यविक्षिपन् प्रतिपक्षः सद्यः प्रतिक्षेप्तव्य इति भावः । तथा हि आरभ्यन्ते इत्यारम्भाः कर्माणि तेषु यत्न उद्योगः स निष्फलोयेषां ते तथोक्ताः । (निष्फलकर्मोपक्रमा इत्यर्थः । अतः के वा परिभवपदं तिरस्कारपदं न

तत्र व्यक्तं दृषदि चरणन्यासमर्द्धेन्दुमौलेः
AMBALAPITIYA.
शश्वत्सिद्धैरुपचितबलिं भक्तिनम्रः परीयाः ।
यस्मिन् दृष्टे करणविगमादूर्ध्वमुद्धूतपापाः
सङ्कल्पन्ते स्थिरगणपदप्राप्तये श्रद्दधानाः ॥ ५६ ॥

स्युर्न भवन्ति सर्व्व एव भवन्तीत्यर्थः । यद्व घनोपलस्तु करक इति यादववचनात् करकशब्दस्य नियतपुंलिङ्गताभिप्रायेण करकाणामावृष्टिरिति केषाञ्चिद्व्याख्यानं तदन्ये नानुमन्यन्ते वर्षोपलस्तु करकेत्यमरवचनव्याख्याने क्षीरस्वामिना कमण्डलौ च करकः सुगते च विनायक इति नानार्थे पुंस्यपि वक्ष्यतीति वदता उभयलिङ्गताप्रकाशनात् । यादवस्य तु पुंलिङ्गताविधाने तात्पर्य्यं न तु स्त्रीलिङ्गतानिषेधं इति न तद्विरोधोऽपि । करकस्तु करङ्के स्याद्दाडिमे च कमण्डलौ। पक्षिभेदे करे चापि करका च घनोपल इति विश्वप्रकाशवचने तूभयलिङ्गता व्यक्तैवेति न कुत्रापि विरोधवार्त्ता । अतएव रुद्रः वर्षोपलस्तु करका करकोऽपि च दृश्यते इति॥ ५५ ॥

तत्रेति । तत्र हिमाद्रौ दृषदि कस्याञ्चिच्छिलायां व्यक्तं प्रकटं शश्वत्सदा सिद्धैर्योगिभिः । सिद्धिर्निष्पत्तियोगयोरिति विश्वः । उपचितबलिं रचितपूजाविधिम् । बलिः पूजोपहारयोरिति यादवः । अर्द्धसामाविन्दुस्यार्द्धेन्दुः । अर्द्धः खण्डे समेंऽशके इति

शब्दायन्ते मधुरमनिलैः कीचकाः पूर्य्यमाणाः
संसक्ताभिस्त्रिपुरविजयो गीयते किन्नरीभिः।

विश्वः। स मौलौ यस्य तस्येश्वरस्य चरणन्यासं पादविन्यासं भक्तिः पूज्येष्वनुरागस्तया नम्रः सन् परीयाः प्रदक्षिणं कुरु। परिपूर्व्वादिणो लिङ्। यस्मिन् पादन्यासे दृष्टे सद्यउद्भूतपापा निरस्तकल्मषाः सन्तः श्रद्दधाना विश्वसन्तः पुरुषाः। श्रद्धा विश्वासः आस्तिक्यबुद्धिरिति यावत्। श्रदन्तरोरुपसर्गवद्वृत्तिर्वक्तव्येति श्रत्पूर्व्वात् दधातेः शानच्। करणस्य क्षेत्रस्य विगमादूर्द्ध्वं देहत्यागानन्तरम्। करणं साधकतं क्षेत्रगात्रेन्द्रियेषु चेत्यमरः। स्थिरं शाश्वतं गणानां प्रमथानां पदं स्थानम्। गणाः प्रमथसंख्यौघा इति वैजयन्ती। तस्य प्राप्तये सङ्कल्पन्ते समर्था भवन्ति। क्लृप्तेः पर्य्याप्तिवचनस्य अलमर्थत्वात् तद्योगे नमःस्वस्तीत्यादिना चतुर्थी। अलमिति पर्य्याप्त्यर्थग्रहणमिति भाष्यकारः। अव्यक्तां व्यञ्जयामास शिवः श्रीचरणद्वयम्। हिमाद्रौ शाम्भवादीनां सिद्धये सर्व्वकर्म्मणाम्। दृष्ट्वा श्रीचरणन्यासं साधकः स्थितये तनुम्। इच्छाधीनशरीरोहि विचरेच्च जगत्त्रयमिति शम्भुरहस्ये॥ ५६॥

शब्दायन्त इति। हे मेघ अनिलैः पूर्य्यमाणाः कीचका वेणुविशेषाः। वेणवः कीचकास्ते स्युर्ये स्वन

निर्ह्रादस्ते मुरज इव चेत् कन्दरेषु ध्वनिः स्यात्
सङ्गीतार्थो ननु पशुपतेस्तत्र भावी समग्रः॥ ५७॥
प्रालेयाद्रेरुपतटमतिक्रम्य तांस्तान् विशेषान्
हंसद्वारं भृगुपतियशोवर्त्म यत् क्रौञ्चरन्ध्रम्।

न्त्यनिलोद्धता इत्यमरः। मधुरं श्रुतिसुखं यथा तथा शब्दायन्ते शब्दं कुर्व्वन्ति स्वनन्तीत्यर्थः। शब्दवैरेत्यादिना क्यङ्। अनेन वंशवाद्यसम्पत्तिरुक्ता। संसक्ताभिः संयुक्ताभिः वंशवाद्यानुषक्ताभिर्वा। संरक्ताभिरिति पाठे संरक्तकण्ठीभिरित्यर्थः। किन्नरीभिः किन्नरस्त्रीभिः। त्रयाणां पुराणां समाहारस्त्रिपुरम्। तद्धितार्थोत्तरपदेति समासः पात्रादित्वान्नपुंसकत्वम्। तस्य विजयो गीयते कन्दरेषु दरीषु। दरीतु कन्दरो वा स्त्रीत्यमरः। ते तव निर्ह्रादो मुरजे वाद्यभेदे ध्वनिरिव मुरजध्वनिरिवेत्यर्थः। स्याच्चेत्तर्हि तत्र चरणसमीपे पशुपतेर्नित्यसन्निहितस्य शिवस्य सङ्गीतं सम्यक् गीतं तदेवार्थः सङ्गीतार्थः सङ्गीतवस्तु। अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिष्वित्यमरः। समग्रः सम्पूर्णो भावी ननु भविष्यति खलु। भविष्यति गम्यादय इति भविष्यदर्थे णिनिः॥ ५७॥

प्रालेयेति। प्रालेयाद्रेर्हिमाद्रेरुपतटं तटसमीपे। अव्ययं विभक्तीत्यादिना समीपार्थेऽव्ययीभावः। तांस्तान्। वीप्सायां द्विरुक्तिः। विशे

ये संरम्भोत्पतनरभसाः स्वाङ्गभङ्गाय तस्मिन्
मुक्ताध्वानं सपदि शरभा लङ्घयेयुर्भवन्तम् ।
तान् कुर्वीथास्तुमुलकरकावृष्टिपातावकीर्णान्
के वा न स्युः परिभवपदं निष्फलारम्भयत्नाः ॥ ५५ ॥

हि अतो हिमाचलस्य दावानलस्त्वया शमयितव्य इति भावः ॥ ५४ ॥

य इति। तस्मिन् हिमाद्रौ संरम्भः कोपः। संरम्भः संक्रमे कोप इति शब्दार्णवः। तेनोत्पतने उत्प्लवने रभसो वेगो येषां ते तथोक्ताः। रभसो वेगहर्षयोरित्यमरः। ये शरभा अष्टापदमृगविशेषाः। शरभः शलभे चाष्टापदे प्रोक्तो मृगान्तर इति विश्वः। मुक्तोऽध्वा शरभोत्प्लवनमार्गो येन तं भवन्तं सपदि स्वाङ्गभङ्गाय लङ्घयेयुः। सम्भावनायां लिङ्। भवतोऽतिदूरत्वात् स्वाङ्गभङ्गातिरिक्तं फलं नास्ति लङ्घनस्येत्यर्थः। तान् शरभान् तुमुलाः सङ्कुलाः करकाः वर्षोपलाः। वर्षोपलस्तु करकेत्यमरः। तासां वृष्टिस्तस्याःपातेनावकीर्णान् विक्षिप्तान् कुर्वीथाः कुरुष्व। विध्यर्थे लिङ्। क्षुद्रोऽप्यविक्षिपन् प्रतिपक्षः सद्यः प्रतिक्षेप्तव्य इति भावः। तथा हि आरभ्यन्ते इत्यारम्भाः कर्माणि तेषु यत्न उद्योगः स निष्फलो येषां ते तथोक्ताः। (निष्फलकर्मोपक्रमा इत्यर्थः। अतः के वा परिभवपदं तिरस्कारपदं न

तत्र व्यक्तं दृषदि चरणन्यासमर्द्धेन्दुमौलेः
शश्वत्सिद्धैरुपचितवलिं भक्तिनम्रः परीयाः ।
यस्मिन् दृष्टे करणविगमादूर्ध्वमुद्धूतपापाः
सङ्कल्पन्ते स्थिरगणपदप्राप्तये श्रद्दधानाः ॥ ५६ ॥

स्युर्न भवन्ति सर्व्व एव भवन्तीत्यर्थः । यदत्र घनोपलस्तु करक इति यादववचनात् करकशब्दस्य नियतपुंल्लिङ्गताभिप्रायेण करकाणामावृष्टिरिति केषाञ्चिद्व्याख्यानं तदन्ये नानुमन्यन्ते वर्षोपलस्तु करकेत्यमरवचनव्याख्याने क्षीरस्वामिना कमण्डलौ च करकः सुगते च विनायक इति नानार्थे पुंस्यपि वक्ष्यतीति वदता उभयलिङ्गताप्रकाशनात् । यादवस्य तु पुंल्लिङ्गताविधाने तात्पर्य्यं नतु स्त्रीलिङ्गतानिषेधं इति न तद्विरोधोऽपि । करकस्तु करङ्के स्याद्दाडिमे च कमण्डलौ। पक्षिभेदे करे चापि करका च घनोपल इति विश्वप्रकाशवचने तूभयलिङ्गता व्यक्तैवेति न कुत्रापि विरोधवार्त्ता । अतएव रुद्रः वर्षोपलस्तु करका करकोऽपि च दृश्यते इति ॥ ५५ ॥

तत्रेति । तत्र हिमाद्रौ दृषदि कस्याञ्चिच्छिलायां व्यक्तं प्रकटं शश्वत्सदा सिद्धैर्योगिभिः । सिद्धिर्निष्पत्तियोगयोरिति विश्वः । उपचितवलिं रचितपूजाविधिम् । वलिः पूजोपहारयोरिति यादवः । अर्द्धस्यामाविन्दुर्यस्येत्यर्द्धेन्दुः । अर्द्धः खण्डे समेंऽशके क्लीं

शब्दायन्ते मधुरमनिलैः कीचकाः पूर्य्यमाणाः
संसक्ताभिस्त्रिपुरविजयो गीयते किन्नरीभिः ।

विम्बः। स मौलौ यस्य तस्येश्वरस्य चरणन्यासं पादविन्यासं भक्तिः पूज्येष्वनुरागस्तया नम्रः सन् परीयाः प्रदक्षिणं कुरु। परिपूर्व्वादिणो लिङ्। यस्मिन् पादन्यासे दृष्टे सद्यउद्धूतपापा निरस्तकल्मषाः सन्तः श्रद्दधाना विश्वसन्तः पुरुषाः। श्रद्धा विश्वासः आस्तिक्यबुद्धिरिति यावत्। श्रदन्तरोरुपसर्गवद्वृत्तिर्वक्तव्येति श्रत्पूर्व्वात् दधातेः शानच्। करणस्य चेतस्य विगमादूर्द्ध्वं देहत्यागानन्तरम्। करणं साधकतं क्षेत्रगात्रेन्द्रियेषु चेत्यमरः। स्थिरं शाश्वतं गणानां प्रमथानां पदं स्थानम्। गणाः प्रमथसंख्यौघा इति वैजयन्ती। तस्य प्राप्तये सङ्कल्पन्ते समर्था भवन्ति। क्लृप्तेः पर्य्याप्तिवचनस्य अलमर्थत्वात् तद्योगे नमःस्वस्तीत्यादिना चतुर्थी। अलमिति पर्य्याप्त्यर्थग्रहणमिति भाष्यकारः। अव्यक्तं व्यञ्जयामास शिवः श्रीचरणद्वयम्। हिमाद्रौ शाम्भवादीनां सिद्धये सर्व्वकर्म्मणाम्। दृष्ट्वा श्रीचरणन्यासं साधकः स्थितये तनुम्। इच्छाधीनशरीरोहि विचरेच्च जगत्त्रयमिति शम्भुरहस्ये॥ ५६ ॥

शब्दायन्त इति। हे मेघ अनिलैः पूर्य्यमाणाः कीचका वेणविशेषाः। वेणवः कीचकास्ते स्युर्ये स्वन

निर्ह्रादस्ते मुरज इव चेत् कन्दरेषु ध्वनिः स्यात्
सङ्गीतार्थो ननु पशुपतेस्तत्र भावी समग्रः॥ ५७॥

प्रालेयाद्रेरुपतटमतिक्रम्य तांस्तान् विशेषान्
हंसद्वारं भृगुपतियशोवर्त्म यत् क्रौञ्चरन्ध्रम्।

न्त्यनिलोद्धता इत्यमरः। मधुरं श्रुतिसुखं यथा तथा शब्दायन्ते शब्दं कुर्व्वन्ति स्वनन्तीत्यर्थः। शब्द वैरेत्यादिना क्यङ्। अनेन वंशवाद्यसम्पत्तिरुक्ता। संसक्ताभिः संयुक्ताभिः वंशवाद्यानुषक्ताभिर्वा। संरक्ताभिरिति पाठे संरक्तकण्ठीभिरित्यर्थः। किन्नरीभिः किन्नरस्त्रीभिः। त्रयाणां पुराणां समाहारस्त्रिपुरम्। तद्धितार्थोत्तरपदेति समासः पात्रादित्वान्नपुंसकत्वम्। तस्य विजयो गीयते कन्दरेषु दरीषु। दरीतु कन्दरो वा स्त्रीत्यमरः। ते तव निर्ह्रादो मुरजे वाद्यभेदे ध्वनिरिव मुरजध्वनिरिवेत्यर्थः। स्याच्चेत्तर्हि तत्र चरणसमीपे पशुपतेर्नित्यसन्निहितस्य शिवस्य सङ्गीतं सम्यक् गीतं तदेवार्थः सङ्गीतार्थः सङ्गीतवस्तु। अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिष्वित्यमरः। समग्रः सम्पूर्णोभावी ननु भविष्यति खलु। भविष्यति गम्यादय इति भविष्यदर्थे णिनिः॥ ५७॥

प्रालेयेति। प्रालेयाद्रेर्हिमाद्रेरुपतटं तटसमीपे। अव्ययं विभक्तीत्यादिना समीपार्थेऽव्ययीभावः। तांस्तान्। वीप्सायां द्विरुक्तिः। विशे

तेनोदीचीं दिशमनुसरेस्तिर्य्यगायामशोभी
श्यामः पादो बलिनियमनाभ्युद्यतस्येव विष्णोः॥५८॥

षान् द्रष्टव्यार्थान्। विशेषोऽवयवे द्रव्ये द्रष्टव्योत्त मवस्तुनीति शब्दार्णवः। अतिक्रम्य अनुसरेरि त्यनागतेन सम्बन्धः। हंसानां द्वारं हंसद्वारम्। मानसस्थायिनो हंसाः क्रौञ्चरन्ध्रेण सञ्चरन्त इत्या गमः। भृगुपतेर्जामदग्न्यस्य यशोवर्त्म यशःप्रव त्तिकारणमित्यर्थः। यत् क्रौञ्चस्याद्रेरन्ध्रमस्ति तेनक्रौ ञ्चबिलेन बलेर्दैत्यस्य नियमने बन्धनेऽभ्युद्यतस्य प्रव त्तस्य विष्णोर्व्यापकस्य त्रिविक्रमस्य श्यामःकृष्णवर्णः पादइव तिर्य्यगायामेन च्छिद्रप्रवेशनार्थं तिरश्चीनदै र्घ्येण शोभत इति तथाविधः सन् उदीचीमुत्तरां दिश मनुसरेनुगच्छ। पुरा किल भगवतो देवाद्धूर्जटेर्द्धनु रूपनिषदमधीयानेन भृगुनन्दनेन स्कन्दस्य स्पर्द्धया क्रौञ्चशिखरिणमतिनिशितविशिखमुखेन हेलया कृत्पिण्डभेदं भित्त्वा तत एव क्रौञ्च क्रोडादिव सद्यः समुज्जृम्भिते कस्मिन्नपि यशःक्षीरनिधौ निखिलमपि जगज्जालमाप्लावितमिति कथा श्रूयते॥५८॥

गत्वेति। क्रौञ्चबिलनिर्गमनानन्तरम् ऊर्द्ध्व ञ्च गत्वा दशमुखस्य रावणस्य भुजैर्बाहुभिरुच्छ्वा सिताः विश्लेषिताः प्रस्थानां सानूनां सन्धयोयस्य स तस्य। त्रयोदश परिमाणमेषामस्तीति त्रिद

गत्वा चोर्द्धं दशमुखभुजोच्छ्वासितप्रस्थसन्धेः
कैलासस्य त्रिदशवनितादर्पणस्यातिथिः स्याः ।
शृङ्गोच्छ्रायैः कुमुदविशदैर्यो वितत्य स्थितः खं
राशीभूतः प्रतिदिनमिव त्र्यम्बकस्याट्टहासः ॥ ५८ ॥
उत्पश्यामि त्वयि तटगते स्निग्धभिन्नाञ्जनाभे
सद्यःकृत्तद्विरददशनच्छेदगौरस्य तस्य ।

शाः । संख्ययाव्ययेत्यादिना बहुव्रीहिः । बहु व्रीहौ संख्येयेत्यादिना समासान्तो डजिति चीर स्वामी । त्रिदशानां देवानां वनितास्तासां दर्पणस्य । कैलासस्य स्फटिकत्वाद्रजतत्वाद्वा विम्बग्राहित्वेनेद मुक्तम् । कैलासस्यातिथिः स्याः । यः कैलासः कु मुदविशदैः निर्म्मलैः शृङ्गाणामुच्छ्रायैरौन्नत्यैः ख माकाशं वितत्य व्याप्य प्रतिदिनं दिनेदिने राशीभूतः त्र्यम्बकस्य त्रिलोचनस्याट्टहासोऽतिहास इव स्थितः । अट्टावतिशयक्षामाविति यादवः । धावल्याद्धासत्वेनो त्प्रेक्षा । हासादीनां धावल्यं कविसमयसिद्धम् ॥५८॥

उत्पश्यामीति । स्निग्धं मसृणं भिन्नं मर्द्दितञ्च यदञ्जनं कज्जलं तस्येवाभा यस्य तस्मिन् त्वयि तटगते सानुं गते सति सद्यः कृत्तस्य छिन्नस्य द्विर ददशनस्य गजदन्तस्य छेदवत् गौरस्य धवलस्य तस्य अद्रेः कैलासस्य मेचके श्यामले । कालश्यामलमे चका इत्यमरः । वाससि वस्त्रे अंसन्यस्ते सति हल

शोभामद्रेस्तिमितनयनप्रेक्षणीयां भवित्री
मंसन्यस्ते सति हलभृतोमेचके वाससीव ॥ ६० ॥
हित्वा तस्मिन् भुजगवलयं शम्भुना दत्तहस्ता
क्रीड़ाशैले यदि च विचरेत् पादचारेण गौरी।
भङ्गीभक्त्या विरचितवपुः स्तम्भितान्तर्जलौघः
सोपानत्वं कुरु मणितटारोहणायाग्रयायी ॥ ६१ ॥

भृतोबलभद्रस्येव स्तिमिताभ्यां नयनाभ्यां प्रेक्षणीयां शोभां भवित्रीं भाविनीमुत्पश्यामि शोभा भविष्यतीति तर्कयामीत्यर्थः। श्रौती पूर्णोपमालङ्कारः॥६०॥

हित्वेति। तस्मिन् क्रीडाशैले कैलासे। कैलासः कनकाद्रिश्च मन्दरोगन्धमादनः। क्रीडार्थं निर्म्मिताः शम्भोर्देवैः क्रीडाद्रयोऽभवन्निति शम्भुरहस्ये। शम्भुना शिवेन भुजगमेव वलयं कङ्कणं हित्वा गौर्य्याभीरुत्वात् त्यक्त्वा दत्तहस्ता सती गौरीपादचारेण विचरेद्यदि तर्हि अग्रयायी पुरोगतः तथा स्तम्भितो घनीभावं प्रापितोऽन्तर्ज्जलस्यौघः प्रवाहो येन स तथाभूतः भङ्गीनां पर्वणां भक्त्या रचनया विरचितवपुःकल्पितशरीरः सन् मणीनां तटम् मणितटं तस्यारोहणाय सोपानत्वं कुरु सोपानभावं भजेत्यर्थः॥ ६१ ॥

तत्रेति। तत्र कैलासे अवश्यं सर्व्वथा सुरयुवतयो वलयकुलिशानि कङ्कणकोटयः। शतकोटिवाचिना कुलिशशब्देन कोटिमात्रं लक्ष्यते तैरुद्घट्टनात्रि

तत्रावश्यं वलयकुलिशोद्घट्टनोद्गीर्णतोयं
नेष्यन्ति त्वां सुरयुवतयो यन्त्रधारागृहत्वम्।
ताभ्यो मोक्षस्तव यदि सखे घर्म्मलब्धस्य न स्यात्
क्रीडालोलाः श्रवणपरुषैर्गर्जितैर्भीषयेस्ताः॥ ६२॥
हेमाम्भोजप्रसवि सलिलं मानसस्यादटानः
कुर्व्वन् कामं क्षणमुखपटप्रीतिमैरावतस्य।

प्रहारा स्तैरुद्गीर्णमुत्सृष्टं तोयं येन तं त्वां यन्त्रेषु धाराःयन्त्रधारास्तासां गृहत्वं कृत्रिमधारागृहत्वं नेष्यन्ति प्रापयिष्यन्ति हे सखे मित्र घर्म्मे निदाघे लब्धस्य। घर्म्मलब्धत्वञ्चास्य देवभूमिषु सर्व्वदा सर्व्वर्तुसमाहारात् प्राथमिकमेघत्वाद्वा यथोक्तमाषाढस्य प्रथमेति। तव ताभ्यःसुरयुवतिभ्यःमोक्षोन स्याद्यदि तदा क्रीडालोलाःक्रीडासक्ताः प्रमत्ता इत्यर्थः ताःसुरयुवतीःश्रवणपरुषैःकर्णकटुभिर्गर्जितैःकरणैर्भीषयेस्त्रासयेः।अत्र हेतुभयाभावादात्मनेपदं पुगागमश्च न॥६२॥

हेमेति। हे जलद हेमाम्भोजानां प्रसविजनकं मानसस्य सरसः सलिलमादटानः पिवन्नित्यर्थः। तथैरावतस्येन्द्रगजस्य। कामचारित्वाद्वा शिवसेवार्थमिन्द्रागमनाद्वा समागतस्येति भावः। क्षणेजलदानकाले मुखे पटेन या प्रीति स्तां कुर्व्वन्। तथा कल्पद्रुमाणां किशलयानि पल्लवभूतानि अंशुकानि सूक्ष्मवस्त्राणीव। अंशुकं वस्त्रमात्रे स्यात् परि

धुन्वन् कल्पद्रुमकिशलयान्यंशुमानीव वातै
र्नानाचेष्टैर्जलद ललितैर्निर्विशेस्तं नगेन्द्रम्॥६३॥
तस्योत्सङ्गे प्रणयिन इव स्रस्तगङ्गादुकूलां
न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन्।

धानोत्तरीययोः। सूक्ष्मवस्त्रे नातिदीप्ताविति शब्दार्ण वे। वातैर्मेघवातैर्धुन्वन्। नाना बहुविधाश्चेष्टास्तो यपानादयो येषु तैर्ललितैः क्रीडितैः। ना भावभेदे स्त्रीनृत्ये ललितं त्रिषु सुन्दरे। अस्त्रियां प्रमदागारे क्रीडिते जातपल्लवे इति शब्दार्णवः। तं नगेन्द्रं कैलासं कामं यथेष्टं निर्विशेः समुपभुङ्क्ष्व। निर्वेशो भृतिभोगयोरित्यमरः। यथेच्छ विहारो मित्र गृहेषु मैत्र्याः फलम्। सहजमित्रञ्च ते कैलासः। मेघप र्वतयोरजस्रूर्य्ययोरब्धिचन्द्रयोः शिखिजीमूतयोः स मीराग्नेराम्मित्रता स्वयमिति भावः॥ ६३॥

तस्येति। प्रणयिनः प्रियतमस्येव तस्य कैलास स्योत्सङ्गे ऊर्द्ध्वभागे कटौ च। उत्सङ्गोमुक्तसंयोगे सक्थन्यूर्द्ध्वतलेपि चेति मालतीमालायाम्। गंङ्गा दु कूलं शुभ्रवस्त्रमिवेत्युपमितसमासः। दुकूलं सूक्ष्मवस्त्रे स्यादुत्तरीये सितांशुक इति शब्दार्णवः। अन्यत्र तु गङ्गेवदुकूलम्। तत् स्रस्तं यस्यास्तां तथोक्तामलकां कुवेरनगरीं दृष्ट्वा कामिनीमिवेति शेषः। हे का मचारिन् त्वं पुनस्त्वन्तु न ज्ञास्यसे इति न किन्त

यत्र वः काले वहति सलिलोद्गारमुच्चैर्विमाना
मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम् ॥ ६४ ॥

ज्ञास्यस एवेत्यर्थः । कामचारिणस्ते पूर्व्वमपि बहु
कृत्वोदर्शनसम्भवादविज्ञानमसम्भावितमेवेति निश्च
यार्थं नञ्द्वयप्रयोगः । तदुक्तं स्मृतिनिश्चयसिद्धा
र्थेषु नञ्द्वयप्रयोग इति । उच्चैरुन्नतानि विमाना
नि सप्तभूमिकभवनानि यस्यां सा । विमानोऽस्त्री
देवयाने सप्तभूमौ च सद्मनीति यादवः । मेघसंवाह
नस्थानसूचनार्थमिदं विशेषणम् । अन्यत्र विमाना
निष्कोपा । या अलका वो युष्माकं काले मेघकाल इ
त्यर्थः अभ्रवृन्दं मेघकदम्बकं कामिनी स्त्री मुक्ताजा
लैर्मौक्तिकसरैर्ग्रथितं प्रत्युप्तम् । पुंस्त्र्यां मौक्तिके मु
क्तेति यादवः । अलकमिव चूर्णकुन्तलानीव जात्यैक
वचनम् । अलकाश्चूर्णकुन्तला इत्यमरः । वहति
बिभर्त्ति । अत्र कैलासस्यानुकूलनायकत्वम् अलका
यास्तु स्वाधीनपतिकाख्यनायिकात्वं ध्वन्यते । एका
यत्तोऽनुकूलः स्यादिति, प्रियोपलालिता नित्यं स्वाधी
नपतिका मतेति च लक्षयन्ति । उदाहरन्ति च
लालयन्नलकप्रान्तान् रचयन् पत्रमञ्जरीम् । एकां
विनोदयन् कान्तां छायावदनुवर्त्तते इति ॥ ६४ ॥

इति श्रीकोलाचलमल्लिनाथ सूरिविरचितायां मेघसन्देशव्याख्यायां
सञ्जीवन्यां पूर्व्वमेघः ॥

उत्तरमेघः ।

विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्राः
सङ्गीताय प्रहतमुरजाः स्निग्धगम्भीरघोषम् ।
अन्तस्तोयं मणिमयभुवस्तुङ्गमभ्रंलिहाग्राः
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः ॥ १ ॥

विद्युत्वन्तमिति । यत्रालकायां ललिता रम्या वनिताःस्त्रियो येषु ते सह चित्रैर्वर्त्तन्त इति सचित्राः । आलेख्याश्चर्य्ययोश्चित्रमित्यमरः । तेन सहेति तुल्ययोग इति बहुव्रीहिः । वोपसर्जनस्येति सह शब्दस्य समासः । सङ्गीताय तौर्य्यत्रिकाय प्रहतमुरजास्ताडितमृदङ्गाः मुरजा तु मृदङ्गे स्यादिति शब्दार्णवे । मणिमय्यो मणिविकारा भुवो येषु अभ्रं लिहन्तीत्यभ्रं लिहान्यभ्रङ्कषाणि । वहाभ्रे लिह इति खच्प्रत्ययः । अरुर्द्विषेत्यादिना मुमागमः । अग्राणि शिखराणि येषां ते तथोक्ताः अतितुङ्गा इत्यर्थः प्रासादा देवगृहाणि । प्रासादो देवभूर्भुजामित्यमरः । विद्युतोऽस्य सन्तीति विद्युत्वन्तं सेन्द्रचापमिन्द्रचापवन्तं स्नि

हस्ते लीलाकमलमलके बालकुन्दानुविद्धं
नीता लोध्रप्रसवरजसा पाण्डुतामानने श्रीः ।

न्धः श्राव्यो गम्भीरो घोषो गर्जितं यस्य तम् अन्तर न्तर्गतं तोयं यस्य तं तुङ्गमुन्नतं त्वां तैस्तैर्व्विशेषै ललित वनितत्वादिधर्म्मैस्तुलयितुं समीकर्तुम् अलं पर्य्याप्ताः । अलं भूषणपर्य्याप्तिशक्तिवारणवाचकमित्यमरः ॥ १ ॥

सम्प्रति सर्व्वदा सर्व्वर्तुसम्पत्तिमाह

हस्त इति । यत्रालकायां वधूनां स्त्रीणां हस्ते लीलार्थं कमलं लीलाकमलं शरल्लिङ्गमेतत् तदुक्तं शरत् पङ्कजलक्षणेति । अलके कुन्तले जातावेकवचनम् । अलकेष्वित्यर्थः । बालकुन्दैः प्रत्यग्रमाघ्यकुसुमैरनुविद्धम् अनुवेधोग्रन्थनम् । नपुंसके भावे क्तः । यद्यपि कुन्दानां शैशिरत्वमस्ति माघ्यं कुन्दमित्यभिधानात् तथापि हेमन्ते प्रादुर्भावः शिशिरे प्रौढत्वमिति व्यवस्थाभेदेन हेमन्तकार्य्यत्वमित्याशयेन बालेतिविशेषणम् । अलकमिति प्रथमान्तपाठे सप्तमीप्रक्रमभङ्गः स्यात् । नाथस्तु नियतपुंलिङ्गताहानिश्चेति दोषान्तरमाह तदसत् स्वभाववक्राण्यलकानि तासाम्, निर्धूतान्यलकानि प्राप्ततमुरः क्षतैरधरः खण्डित इत्यादिषु प्रयोगेषु नपुंसकलिङ्गतादर्शनात् । आनने मुखे लोध्रप्रसवानां लोध्रपुष्पाणां

चूडापाशे नवकुरवकं चारु कर्णे शिरीषं
सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम् ॥ २ ॥
यत्रोन्मत्तभ्रमरमुखराः पादपा नित्यपुष्पा
हंसश्रेणीरचितरसना नित्यपद्मा नलिन्यः ।

शैशिराणां रजसा परागेण । प्रसवस्तु फले पुष्पे वृक्षाणां गर्भमोचन इति विश्वः । पाण्डुतां नीता श्रीः शोभा । चूडापाशे केशपाशे नवकुरवकं वासन्तः पुष्पविशेषः । कर्णे चारु पेशलं शिरीषं ग्रैष्मः पुष्पविशेषः । सीमन्ते मस्तककेशवीथ्याम् । सीमन्तमस्त्रियां मस्तकेशवीथ्यामुदाहृतमिति शब्दार्णवे । तवोपगमो मेघागम इत्यर्थः तत्र जातं त्वदुपगमजं वार्षिकमित्यर्थः नीपं कदम्बकुसुमम् । सर्वत्रास्तीति शेषः अस्तिर्भवति परः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्तीति न्यायात् । इत्थं कमलकुन्दादि तत्तत्कार्य्यसमाहाराभिधानानादर्थात् सर्वर्तुसमाहारसिद्धिः कारणं विना कार्य्यस्यासिद्धेरिति भावः ॥ २ ॥

यत्रेति । यत्र अलकायां पादपा वृक्षा नित्यानि पुष्पाणि येषां ते तथा नतु ऋतुनियमादिति भावः अतएवोन्मत्तैर्भ्रमरैर्मुखराः शब्दायमानाः। नलिन्यः पद्मिन्यो नित्यानि पद्मानि यासां तास्तथा ननु हेमन्तवर्ज्जितमित्यर्थः । अतएव हंसश्रेणीभी

केकोत्कण्ठा भवनशिखिनो नित्यभास्वत्कलापा
नित्यज्योत्स्नाः प्रतिहततमोवृत्तिरम्या प्रदोषाः ॥३॥
आनन्दोत्थं नयनसलिलं यत्र नान्यैर्निमित्तै-
र्नान्यस्तापः कुसुमशरजादिष्टसंयोगसाध्यात्।
नाप्यन्यस्मात् प्रणयकलहाद्विप्रयोगोपपत्ति-
र्वित्तेशानां न च खलु वयो यौवनादन्यदस्ति ॥ ४ ॥

रचितरसना नित्यं हंस परिवेष्टिता इत्यर्थः भवन शिखिनः क्रीडामयूरा नित्यं भास्वन्तः कलापा वर्हाणि येषां ते तथोक्ताः नतु वर्षास्वेव अतएव केकाभिरुत्कण्ठा उद्ग्रीवाः। प्रदोषा रात्रयः नित्या ज्योत्स्ना यासां ताः नतु शुक्लपक्षएव। अतएव प्रतिहता तमसां वृत्तिर्व्याप्तिर्येषां तेच ते रम्या श्चेति तथोक्ताः ॥ ३ ॥

आनन्दोत्थमिति। यत्रालकायां वित्तेशानां यक्षाणाम्। वित्ताधिपः कुवेरः स्यात् प्रभौ धनिक यक्षयोरिति शब्दार्णवे। आनन्दोत्थम् आनन्दजन्य मेव नयनसलिलम् अन्यैर्निमित्तैः शोकादिभि र्न। इष्टसंयोगेन प्रियजनसमागमेन साध्यान्निवर्त्तनीया न्नत्वप्रतीकार्य्यादित्यर्थः। कुसुमशरजान्मदनशर जादन्यस्तापो नास्ति। प्रणयकलहादन्यस्मात्का रणाद्विप्रयोगोपपत्तिर्विरहप्राप्तिरपि नास्ति। कि

यस्यां यक्षाः शितमणिमयान्येत्य हर्म्यस्थलानि
ज्योतिश्छायाकुसुमरचितान्युत्तमस्त्रीसहायाः।
आसेवन्ते मधु रतिफलं कल्पवृक्षप्रसूतं
त्वद्गम्भीरध्वनिषु शनकैः पुष्करेष्वाहतेषु॥ ५॥

च यौवनादन्यत् वयो वार्द्धकं नास्ति। श्लोकद्वयं प्रक्षिप्तम्॥ ४॥

यस्यामिति। यस्यामलकायां यक्षा देवयोनिविशेषाः उत्तमस्त्री सहायाः ललिताङ्गनासहचराः सन्तः सितमणिमयानि स्फटिकमणिमयानि चन्द्रकान्तमयानि वा अतएव ज्योतिषां तारकाणां छायाः प्रतिबिम्बान्येव कुसुमानि तैः रचितानि परिष्कृतानि। ज्योतिस्ताराग्निभा ज्वालादृक्पुत्राग्रोध्वरात्मस्विति वैजयन्ती। एतेन पानभूमेस्तानशोभत्वमुक्तम्। हर्म्यस्थलान्येत्य प्राप्य त्वद्गम्भीरध्वनिरिव ध्वनि र्येषां तेषु पुष्करेषु वाद्यभाण्डमुखेषु। पुष्करं करिहस्ताग्रे वाद्यभाण्डमुखे जले इत्यमरः। शनकै र्मन्दमाहतेषु सत्सु एतच्च नृत्यगीतयोरप्युपलक्षणम्। कल्पवृक्षप्रसूतं कल्पवृक्षस्य काङ्क्षितार्थप्रदत्वान्मध्वपि तत्र प्रसूतम्। रतिः फलं यस्य तद्रतिफलं मधु मद्यमासेवन्ते आवर्त्त्य पिबन्तीत्यर्थः॥ ५॥

मन्दाकिन्या इति। यत्रालकायाममरप्रार्थिताः

मन्दाकिन्याः सलिलशिशिरैः सेव्यमाना मरुद्भि
र्मन्दाराणामनुतटरुहां छायया वारितोष्णाः।
अन्वेष्टव्यैः कनकसिकतामुष्टिनिक्षेपगूढैः
संक्रीड़न्ते मणिभिरमरप्रार्थिता यत्र कन्याः॥ ६॥

नीवीबन्धोच्छ्वसितशिथिलं यत्र विम्बाधराणां
क्षौमं रागादनिभृतकरेष्वाक्षिपत्सु प्रियेषु।

सुन्दर्य्य इत्यर्थः कन्या यक्षकुमार्य्यः। कन्या कुमारिकानार्य्योरिति विश्वः। मन्दाकिन्यागङ्गायाः सलिलेन शिशिरैः शीतलैर्मरुद्भिः सेव्यमानाः सत्यः तथा अनुतटं तटेषु रोहन्तीत्यनुतटरुहः क्विप्। तेषां मन्दाराणां छायया अनातपेन वारितोष्णाः शमितातपाः सत्यः कनकस्य सिकतासु मुष्टिभिर्निक्षेपेण गूढैः संवृतैः अतएव अन्वेष्टव्यैर्मृग्यैर्मणिभीरत्नैः संक्रीडन्ते गुप्तमणिसंज्ञया दैशिकक्रीडया सम्यक् क्रीडन्तीत्यर्थः। क्रीडोनुसंपरिभ्यश्चेत्यात्मनेपदम्। रत्नादौ वालुकादौ वा गुप्तद्रष्टव्यकर्म्मभिः। कुमारीभिः कृता क्रीडा नाम्ना गुप्तमणिः स्मृत इति शब्दार्णवः॥ ६॥

नीवीति। यत्रालकायाम् अनिभृतकरेषु चपलहस्तेषु प्रियेषु नीवी वसनग्रन्थिः। नीवी परिपणे ग्रन्थौ स्त्रीणां जघनवाससीति विश्वः। सैव बन्धः नीवीबन्धः चूतवृक्षवदपौनरुक्त्यम्। तस्यो

अर्चिस्तुङ्गानभिमुखमपि प्राप्य रत्नप्रदीपान्
ह्रीमूढानां भवति विफलप्रेरणा चूर्णमुष्टिः ॥ ७ ॥
नेत्रा नीताः सततगतिना यद्विमानाग्रभूमी-
रालेख्यानां नवजलकणैर्दोषमुत्पाद्य सद्यः ।

च्छ्वसितेन त्रुटितेन शिथिलं चौमं दुकूलं रागादा चिपत्सु आहरत्सु सत्सु ह्रीमूढानां लज्जाविधुराणां विम्बं विम्बिकाफलम् । विम्बं फलं विम्बिकायाः प्रतिविम्बे च मण्डले इति विश्वः । विम्बमिवाधरो यासां तासां विम्बाधराणां स्त्रीविशेषाणाम् । विशेषाः कामिनी कान्ता भीरुर्विम्बाधराङ्गनेतिशब्दार्णवे । चूर्णस्य कुङ्कुमादेर्मुष्टिः अर्चिर्भिर्मयूखैस्तुङ्गान् । अर्चिर्मयूखशिखयोरिति विश्वः । रत्नान्येव प्रदीपान् अभिमुखं यथा तथा प्राप्यापि विफलप्रेरणा दीपनिर्व्वाणाचमत्वान्निष्फलचेपा भवतीति । अत्राङ्गनानां रत्नप्रदीपनिर्व्वाणप्रवृत्त्या मौग्ध्यं व्यज्यते ॥ ७ ॥

नेत्रेति । हे मेघ नेत्रा प्रेरकेण सततगतिना सदागतिना वायुना । मातरिश्वा सदागतिरित्यमरः । यस्या अलकायां विमानानां सप्तभूमिकभवनानामग्रभूमीरुपरिभूमिकाः नीताः प्रापिताः त्वमिव दृश्यन्त इति त्वादृशाः त्वत्सदृशा इत्यर्थः । त्यदादिषु दृशोनालोचने कञ्चेति कञ् प्रत्ययः ।

शङ्कास्पृष्टा इव जलमुचस्त्वादृशा यत्र जालै
र्धूमोद्गारानुकृतिनिपुणा जर्ज्जरा निष्पतन्ति ॥ ८ ॥
यत्र स्त्रीणां प्रियतमभुजालिङ्गनोच्छ्वासितानां
मङ्गग्लानिं सुरतजनितां तन्तुजालावलम्बाः।

जलमुचो मेघाः आलेख्यानां चित्राणाम्। चित्रं लिखितरूपाद्यं स्यादालेख्यमिति शब्दार्णवे। नव जलकणैर्दोषं स्फोटनमुत्पाद्य सद्यः शङ्कास्पृष्टा इव सापराधत्वाद्भयाविष्टा इव। शङ्का वितर्कभययो रिति शब्दार्णवः। धूमोद्गारस्य धूमनिर्गमस्यानु कृतौ अनुकरणे निपुणाः कुशलाः जर्ज्जरा विशीर्णाः सन्तो जालमार्गैर्गवाक्षरन्ध्रैर्निष्पतन्ति निष्क्राम न्ति। यथा केनचिदन्तःपुरसञ्चारवता दूतेन गूढ वृत्तया रहस्य भूमिं प्रापितास्तत्र स्त्रीणां व्यभि चारदोषमुत्पाद्य सद्यः साशङ्काः प्राप्तवेशान्तरा जाराः क्षुद्रमार्गैर्निष्क्रामन्ति तद्वदिति ध्वनिः। प्रकृतार्थे शङ्कास्पृष्टा इवेत्युत्प्रेक्षा॥ ८ ॥

यत्रेति। यत्रालकायां निशीथेऽर्द्धरात्रे। अर्द्ध रात्रनिशीथौ द्वावित्यमरः। त्वत्संरोधस्य मेघा वरणस्यापगमेन विशदैर्निर्म्मलैश्चन्द्रपादैश्चन्द्रमरी चिभिः। पादा रश्म्यङ्घ्रितुर्य्यांशा इत्यमरः। स्फु टजललवस्यन्दिन उल्बणाम्बुकरणस्राविणः तन्तुजा लावलम्बा वितानलम्बिसूत्रपुञ्जाश्रयास्तद्गुणगुम्फि

त्वत्संरोधापगमविशदैश्चन्द्रपादैर्निशीथे
व्यालुम्पन्ति स्फुटजलवस्यन्दिनश्चन्द्रकान्ताः ॥ ९ ॥
अक्षय्यान्तर्भवननिधयः प्रत्यहं रक्तकण्ठै
रुद्गायद्भिर्धनपतियशः किन्नरैर्यत्र सार्द्धम्।

ता इत्यर्थः चन्द्रकान्ताश्चन्द्रकान्तमणयः प्रियतमानां भुजैरालिङ्गनेषु उच्छ्वासितानां प्रशिथिलीकृतानां श्रान्त्या जलसेकाय वा शिथिलितालिङ्गनानामिति यावत्। स्त्रीणां सुरतजनितामङ्गग्लानिम् अवयवानां ग्लानतामिति यावत् व्यालुम्पन्ति अपनुदन्ति ॥ ९ ॥

अक्षय्येति। यत्रालकायां चेतुं शक्याः क्षय्याः। क्षय्यजय्यौ शक्यार्थे इति निपातः ततो नञ् समासः। भवनानामन्तरन्तर्भवने अव्ययं विभक्तीत्यादिनाव्ययीभावः। अक्षय्या अन्तर्भवने निधयो येषां ते तथोक्ताः। यथेच्छाभोगसम्भावनार्थमिदं विशेषणम्। विबुधवनिता अप्सरसस्ता एव वारमुख्या वेश्याः या एव सहाया येषां ते तथोक्ताः। वारस्त्री गणिका वेश्या रूपाजीवाथ सा जनैः। सत्कृता वारमुख्या स्यादित्यमरः। बद्धालापाः सम्भावितसंलापाः कामिनः कामुकाः प्रत्यहमहन्यहनि अव्ययं विभक्तीत्यादिना समासः। रक्तो मधुरः कण्ठः कण्ठध्वनिर्येषां ते तैः सुन्दरकण्ठध्वनिभिः धनपतियशः कुवेरकीर्त्तिम् उद्गायद्भिः उच्चैर्गायद्भिः देवगानस्य गान्धा

वैभ्राजाख्यं विबुधवनितावारमुख्यासहायाः
बद्धालापा बहिरुपवनं कामिनो निर्विशन्ति ॥ १०॥
गत्युत्कम्पादलकपतितै र्यत्र मन्दारपुष्पैः
पत्रच्छेदैः कनककमलैः कर्णविभ्रंशिभिश्च।
मुक्ताजालैस्तनपरिसरच्छिन्नसूत्रैश्च हारै
र्नैशो मार्गः सवितुरुदये सूच्यते कामिनीनाम् ॥११॥

रग्रामत्वात्तारतरं गायद्भिरित्यर्थः। किन्नरैः सार्द्धं सह विभ्राजस्येदं वैभ्राजं वैभ्राजमित्याख्या यस्य तत् वैभ्राजाख्यम्। विभ्राजेन गणेन्द्रेण वातं वैभ्राजमाख्ययेति शब्दार्णवे। चैत्ररथस्य नामान्तरमेतत्। बहिरुपवनं वाह्योद्यानं निर्विशन्त्यनुभवन्ति ॥१०॥

गतीति। यत्रालकायां कामिनीनामभिसारिकाणां निशि भवो नैशो मार्गः सवितुरुदये सति गत्या गमनेनोत्कम्पः चलनं तस्माद्धेतोरलकेभ्यः पतितैर्मन्दारपुष्पैः सुरतरुकुसुमैः। तथा पत्राणां पत्रलतानां छेदैः खण्डैः पतितैरिति शेषः। तथा कर्णेभ्यो विभ्रश्यन्तीति तैः कनकस्य कमलैः। षष्ठ्या विवक्षितार्थलाभे सति मयटा विग्रहेऽध्याहारदोषः एवमन्यत्राप्यनुसन्धेयम्। तथा मुक्ताजालैर्मौक्तिकसरैः शिरोनिहितैरित्यर्थः। तथा स्तनयोः परिसरः प्रदेशस्तत्र छिन्नानि सूत्राणि येषां तैर्हारैश्च

मत्वा देवं धनपतिसखं यत्र साक्षाद्वसन्तं
प्रायश्चापं न वहति भयान्मन्मथः षट्पदज्यम् ।
सभ्रूभङ्गप्रहितनयनैः कामिलक्ष्येष्वमोघै
स्तस्यारम्भश्चतुरवनिताविभ्रमैरेव सिद्धः ॥ १२ ॥

सूच्यते ज्ञाप्यते मार्गपतितमन्दारकुसुमादिलिङ्गै रयमभिसारिकाणां पन्था इत्यनुमीयत इत्यर्थः॥ ११॥

मत्वेति । यत्रालकायां मन्मथः कामो धनपतेः कुवेरस्य सखा इति धनपतिसखः । राजाहः सखि भ्यष्टच् । तं देवं महादेवं साक्षाद्वसन्तं सखिस्नेहान्निजरूपेण वर्त्तमानं मत्वा ज्ञात्वा भयाद्भालेक्षणभयात् षट्पदा एव ज्या मौर्वी यस्य तं चापं प्रायः प्राचुर्य्येण न वहति न विभर्त्ति । कथं तर्हि तस्य कार्य्यसिद्धिरत आह सभ्रूभङ्गेति तस्य मन्मथस्यारम्भः कामिजनविजयव्यापारः सभ्रूभङ्गं प्रहितानि प्रयुक्तानि नयनानि दृष्टयो येषु तैस्तथोक्तैः कामिन एव लक्ष्याणि तेष्वमोघैः सफलप्रयोगैरित्यर्थः । मन्मथचापोपि क्वचिदपि मोघः स्यादिति भावः । चतुराश्च ता वनिताश्च तासां विभ्रमैर्विलासैरेव सिद्धो निष्पन्नः । यदनर्थकरं पाक्षिकफलञ्च तत्प्रयोगाद्वरं निश्चित साधनप्रयोग इति भावः ॥ १२ ॥

कचधार्य्यं देहधार्य्यं परिधेयं विलेपनम् । च

वासश्चित्रं मधु नयनयोर्विभ्रमादेशदक्षं
पुष्पोद्भेदं सह किसलयैर्भूषणानां विकल्पान्।
लाक्षारागं चरणकमलन्यासयोग्यञ्च यस्या
मेकः सूते सकलमबलामण्डनं कल्पवृक्षः॥ १२॥

तुर्दा भूषणं प्राज्ञः स्त्रीणामन्यच्च दैशिकमिति रसा
करे तदेवैतद्दाह

वास इति। यस्यामलकायां चित्रं नानावर्णं वासो वसनं परिधेयमण्डनमेतत्। नयनयोर्विभ्रमाणामादेशे दक्षम्। अनेन विभ्रमद्वारा मधुनो मण्डनत्वमनुसन्धेयम्। मधु मद्यम्। एतच्च मण्डनं देहधार्य्यन्तर्भाव्यम्। किसलयैः पल्लवैः सह पुष्पोद्भेदम् उभयञ्चेत्यर्थः। इदन्तु कचधार्य्यम्। भूषणानां विकल्पान् विशेषान् देहधार्य्यमेतत्। तथा चरणकमलयोर्न्यासस्य समर्पणस्य योग्यं रज्यतेऽनेनेति रागो रञ्जकद्रव्यं लाक्षैव रागस्तं लाक्षारागञ्च। चकारः अङ्गरागादिविलेपनमण्डनोपलक्षणार्थः। सकलं सर्व्वं चतुर्विधमपीत्यर्थः। अबलामण्डनं योषित्प्रसाधनजातमेकः कल्पवृक्ष एव सूते जनयति। नतु नानासाधनसम्पादनप्रयास इत्यर्थः॥ १२॥

इत्यमलकां वर्णयित्वा तत्र स्वभवनस्याभिज्ञानमाह

तत्रागारं धनपतिगृहानुत्तरेणास्मदीयं
दूराल्लक्ष्यं सुरपतिधनुश्चारुणा तोरणेन।
यस्योपान्ते कृतकतनयः कान्तया वर्द्धितो मे
हस्तप्राप्यस्तवकनमितो बालमन्दारवृक्षः॥ १४॥
वापी चास्मिन्मरकतशिलाबद्धसोपानमार्गा
हैमैश्छन्ना विकचकमलैः स्निग्धवैदूर्य्यनालैः।

तत्रेति। तत्रालकायां धनपतिगृहान् कुवेर गृहानुत्तरेणोत्तरस्मिन्न दूरदेशे। एनवन्यतरस्यामदूरेपञ्चम्या इत्येनप्प्रत्ययः। एनया द्वितीयेति द्वितीया। गृहाः पुंसि च भूम्न्येवेत्यमरः। अस्माकमिदमस्मदीयम्। वृद्धाच्छ इति पक्षे छप्रत्ययः। अगारं गृहं सुरपतिधनुश्चारुणा मणिमयत्वादम्बुधत्वाच्चेन्द्रचापसुन्दरेण तोरणेन वहिर्द्वारेण दूराल्लक्ष्यं दृश्यम् अनेनाभिज्ञानेन दूरत एव ज्ञातुं शक्यमित्यर्थः। अभिज्ञानान्तरमाह यस्यागारस्योपान्ते प्राकारान्तःपार्श्वदेशे मे मम कान्तया वर्द्धितः पोषितः कृतकतनयः कृत्रिमसुतः पुत्त्रत्वेनाभिमन्यमान इत्यर्थः। हस्तप्राप्यैर्हस्तावचेयैः स्तवकैर्गुच्छैर्नमितः। स्याद्गुच्छकस्तु स्तवक इत्यमरः। बालो मन्दारवृक्षः कल्पवृक्षोऽस्तीति शेषः॥ १४॥

पुनरभिज्ञानान्तरमाह चतुर्भिः

वापीति। अस्मिन्मदीयागारे मरकतशिला

यस्यास्तोये कृतवसतयो मानसं सन्निकृष्टं
नाध्यास्यन्ति व्यपगतशुचस्त्वामपि प्रेक्ष्य हंसाः ॥१५॥
तस्यास्तीरे रचितशिखरः पेशलैरिन्द्रनीलैः
क्रीड़ाशैलः कनककदलीवेष्टनप्रेक्षणीयः।

03 JAN

भिर्बद्धः सोपानमार्गो यस्याः सा तथोक्ता विदूरे भवाः वैदूर्य्याः। विदूराञ्ञ्य इति ञ्यप्रत्ययः। वैदूर्य्याणां विकारा वैदूर्य्याणि। विकारार्थेऽण्प्रत्ययः। स्निग्धानि वैदूर्य्याणि नालानि येषां तैः हैमैः सौवर्णिकैः कमलैः छन्ना वापी च अस्तीति शेषः। यस्या वाप्यास्तोये कृतवसतयः कृतनिवासा हंसाः त्वां मेघं प्रेक्ष्यापि व्यपगतशुचो वर्षाकालेपि व्यपगत कलुषजलत्वाद्वीतदुःखाः सन्तः सन्निकृष्टं सन्निहितं सुगममपीत्यर्थः। मानसं नाध्यास्यन्ति नोत्कण्ठया स्मरिष्यन्ति। आध्यानमुत्कण्ठास्मरणमिति काशिकायाम्॥१५॥

तस्या इति। तस्या वाप्यास्तीरे पेशलैश्चारुभिः। चारौ दक्षे च पेशल इत्यमरः। इन्द्रनीलैः रचितशिखरः इन्द्रनीलमणिमयशिखर इत्यर्थः कनककदलीनां वेष्टनेन परिवेष्टनेन प्रेक्षणीयो दर्शनीयः क्रीडाशैलोऽस्तीति शेषः। हे सखे उपान्तेषु स्फुरितास्तडितो यस्य तत्तथोक्तम्। इदं विशेषणं कदलीसाम्यार्थमुक्तम्। इन्द्रनीलसाम्यन्तु

मद्गेहिन्याः प्रिय इति सखे चेतसा कातरेण
प्रेक्ष्योपान्तस्फुरिततडितं त्वां तमेव स्मरामि ॥१९॥
रक्ताशोकश्चलकिशलयः केसरश्चात्र कान्तः
प्रत्यासन्नौ कुरवकवृतेर्माधवीमण्डपस्य।

मेघस्य स्वाभाविकमित्यनेन सूच्यते। त्वां प्रेक्ष्य मद्गेहिन्याः प्रिय इति हेतो स्तस्य शैलस्य मद्गृहिणीप्रियत्वाद्धेतोरित्यर्थः। कातरेण भीतेन चेतसा। भयञ्चात्र सानन्दमेव वस्तूनामनुभूतानां तुल्यश्रवणदर्शनात्। श्रवणात्कीर्त्तनाद्वापि सानन्दाभीर्यथा भवेदिति रसाकरे दर्शनात्। तमेव क्रीडाशैलमेव स्मरामि एवकारो विषयान्तरव्यवच्छेदार्थः। सदृशवस्त्वनुभवादिष्टार्थस्मृतिर्जायत इत्यर्थः। अतएवात्र स्मरणाख्योऽलङ्कारः। तदुक्तं सदृशानुभवादन्यस्मृतिः स्मरणमुच्यत इति। निरुक्तकारस्तु त्वां तमेव स्मरामीति योजयित्वा मेघे शैलत्वारोपमाचष्टे तन्न अद्राकारारोपस्य पुरोवर्त्तिन्यनुभवात्मकत्वेन स्मरतिप्रयोगानुपपत्तेः। शैलत्वभावनास्मृतिरित्यपि नोपपद्यते भावनायाः स्मृतित्वे प्रमाणाभावात् सादृश्योपन्यासस्य वैयर्थ्याच्च असदृशेऽपि शालग्रामे हरिभावनादर्शनादिति ॥१९॥

रक्तेति। अत्र क्रीडाशैले कुरवका एव वृतिरावरणं यस्य तस्य मधौ वसन्तेभवा माधव्यस्तासां

एकः सख्यास्तव सह मया वामपादाभिलाषी
काङ्क्षत्यन्यो वदनमदिरां दोहदच्छद्मनास्याः ॥१७॥

मण्डपस्यातिमुक्तलतागृहस्य। अतिमुक्तः पुण्ड्रकः स्याद्वासन्ती माधवीलतेत्यमरः। प्रत्यासन्नौ सन्निकृष्टौ चलकिसलयश्चञ्चलपल्लवः। अनेन वृक्षस्य पादताडनेषु प्राञ्जलित्वं व्यज्यते रक्ताशोकः रक्तविशेषणं तस्य स्मरोद्दीपकत्वादुक्तं अशोकस्तु श्वेतो रक्त इति द्विधा। वङ्गसिद्धिकरः श्वेतो रक्तोऽत्र स्मरवर्द्धन इत्यशोककल्पे दर्शनात्। कान्तः कमनीयः केसरो वकुलश्च। अथ केसरे वकुलो वञ्जुल इत्यमरः। स इति शेषः। एकस्तयोरन्यतरः प्राथमिकत्वादशोक इत्यर्थः मया सह तव सख्याः स्वप्रियाया इत्यर्थः। वामपादाभिलाषी दोहदच्छद्मनेत्यत्रापि सम्बन्धनीयम्। अन्यः केसरः दोहदं वृक्षादीनां प्रसवकारणं संस्कारद्रव्यम्। तरुगुल्मलतादीनामकाले कुशलैः कृतम्। पुष्पाद्युत्पादकं द्रव्यं दोहदं स्यात्तु तत्क्रियेति शब्दार्णवे। तस्य छद्मना व्याजेन। कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे इत्यमरः। अस्यास्तव सख्याः वदनमदिरां गण्डूषमद्यं काङ्क्षति मया सहेत्यत्रापि सम्बन्धनीयम्। अशोकवकुलयोः स्त्रीपादताडनगण्डूषमदिरे दोहदमिति प्रसिद्धिः। स्त्रीणां स्पर्शात् प्रियङ्गुर्वि

तन्मध्ये च स्फटिकफलका काञ्चनी वासयष्टि
र्मूले बद्धा मणिभिरनतिप्रौढवंशप्रकाशैः ।
तालैः शिञ्जावलयसुभगैर्नर्त्तितः कान्तया मे
यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद्वः ॥ १८॥

कसति वकुलः शीधुगण्डूषसेकात् पादाघातादशोक
स्तिलककुरवकौ वीक्षणालिङ्गनाभ्याम् । मन्दारो
नर्म्मवाक्यात् पटुमृदुहसनाच्चम्पको वक्त्रवाताच्चूतोगी
तान्नमेरुर्विकसति च पुरोनर्त्तनात् कर्णिकारः ॥१७॥

तन्मध्य इति । किञ्चेति चार्थः । तन्मध्ये तयो
र्वृक्षयोर्मध्ये अनतिप्रौढानामनतिकठोराणां वंशानां
प्रकाश इव प्रकाशो येषां तैस्तरुणवेणुसुच्छायैर्म
णिभिर्मरकतशिलाभिः मूले बद्धा कृतवेदिकेत्यर्थः ।
स्फटिकं स्फटिकमयं फलकं पीठं यस्याः सा काञ्च
नस्य विकारः काञ्चनी सौवर्णी वासयष्टिर्वासदण्डो
ऽस्तीति शेषः । शिञ्जा भूषणध्वनिः भूषणानान्तु
शिञ्जितमित्यमरः । भिदादित्वादङ् । शिञ्जिधातु
रयं तालव्यादिर्नतुदन्त्यादिः । शिञ्जाप्रधानानि
वलयानि तैः सुभगा रम्यास्तैस्तालैः करतलवादनै
र्मे मम कान्तया नर्त्तितो वो युष्माकं सुहृत् सखा
नीलकण्ठोमयूरः । मयूरो बर्हिणो बर्ही नीलक
ण्ठो भुजङ्गभुगित्यमरः । दिवसविगमे सायंका
ले यां यष्टिकामध्यास्ते यष्ट्यामास्त इत्यर्थः । अधि

एभिः साधो हृदयनिहितैर्लक्षणैर्लक्षयेथाः
द्वारोपान्ते लिखितवपुषौ शङ्खपद्मौ च दृष्ट्वा।
क्षामच्छायं भवनमधुना मद्वियोगेन नूनं
सूर्य्यापाये न खलु कमलं पुष्यति स्वामभिख्याम्॥१८॥

शीङ्स्थासां कर्म्मेति कर्म्मत्वात् द्वितीया। तत्रागार मित्यारभ्य पञ्चसु श्लोकेषु सम्पद्वस्तुवर्णनादुदात्ता लङ्कारः। तदुक्तम्। तदुदात्तं भवेद्यत्र सम्पद्वस्तु वर्ण्यत इति॥ १८॥

एभिरिति। हे साधो निपुण। साधुः समर्थौ निपुणौचेति काशिकायाम्। हृदयनिहितैरविस्मृतैरित्यर्थः। एभिः पूर्वोक्तैर्लक्षणैस्तोरणादिभिरभिज्ञानैः द्वारोपान्ते एकवचनमभिवक्षितं द्वारपार्श्वयोरित्यर्थः। लिखिते वपुषी आकृती ययो स्तौ तथोक्तौ शङ्खपद्मौ नाम निधिविशेषौ। निधिर्ना शेवधिर्भेदाः पद्मशङ्खादयो निधेरित्यमरः। दृष्ट्वा च नूनं सत्यम् अधुनेदानीं मद्वियोगेन मम प्रवासेन क्षामच्छायम् उत्सवोपरमात् क्षीणकान्ति भवनं मद्गृहं लक्षयेथा निश्चिनुयाः। तथाहि सूर्य्यापाये सति कमलं पद्मं स्वामात्मीयामभिख्यां शोभाम्। अभिख्या नामशोभयोरित्यमरः। न पुष्यति नोपचिनोति खलु सूर्य्यविरहितं पद्ममिव प्रतिविरहितं गृहं न शोभत इत्यर्थः॥ १९॥

गत्वा सद्यः कलभतनुतां शीघ्रसम्पातहेतोः
क्रीड़ाशैले प्रथमकथिते रम्यसानौ निषसः।
अर्हस्यन्तर्भवनपतितां कर्त्तुमल्पाल्पभासं
खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिम्॥ २०॥

निजगृहनिश्चयानन्तरं कृत्यमाह

गत्वेति। हे मेघ शीघ्रसम्पात एव हेतुस्तस्य शीघ्रप्रवेशार्थमित्यर्थः। षष्ठी हेतुप्रयोग इति षष्ठी। सम्पातः पतिते योगे प्रवेशे वेदसम्बिदे इति शब्दार्णवे। सद्यः सपदि कलभस्य करिपोतस्य तनुरिव तनुर्यस्य तस्य भावस्तामल्पशरीरतां गत्वा प्राप्य, प्रथमकथिते तस्यास्तीर इत्यादिना पूर्वोद्दिष्टे रम्यसानौ निषीदनयोग्य इत्यर्थः। क्रीडाशैले निषसः उपविष्टः सन् अल्पाल्पा अल्पप्रकारा भाः प्रकाशो यस्यास्तां प्रकारे गुणवचनस्येति द्विरुक्तिः। खद्योतानामाली तस्या विलसितेन स्फुरितेन निभां समानां विद्युदुन्मेषो विद्युत्प्रकाशः स एव दृष्टिस्तां भवनस्यान्तरन्तर्भवनं तत्र पतितां प्रविष्टां कर्त्तुमर्हसि। यथा कश्चित् किञ्चिदन्विष्यन् क्वचिदुन्नते स्थित्वा शनैःशनैरतितरां द्राघीयसीं दृष्टिमिष्टदेशे पातयति तद्वदित्यर्थः॥ २०॥

सम्प्रति दृष्टिपातफलमभिज्ञानञ्च श्लोकद्वयेनाह

तन्वीति। तन्वी कृशाङ्गी। सूक्ष्मं कृशं तत

तन्वी श्यामा शिखरिदशना पक्वबिम्बाधरोष्ठी
मध्ये क्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः।

रित्यमरः। वोतोगुणवचनादिति ङीप्। श्यामा युवतिः। श्यामा यौवनमध्यस्था इत्युत्पलमालायाम्। शिखराण्येषां सन्तीति शिखरिणः कोटिमन्तः। शिखरं शैलवृक्षाग्रकक्षापुलककोटिष्विति विश्वः। शिखरिणो दशना दन्ता यस्याः सा। एतेनास्याः भाग्यवत्त्वं पत्यायुष्करत्वञ्च सूच्यते तदुक्तं सामुद्रिके। स्निग्धाः समानरूपाः सुपङ्क्तयः शिखरिणः श्लिष्टाः। दन्ता भवन्ति यासां ताः शालयन्ति जगत्सर्वम्। ताम्बूलरसरक्तोऽपि स्फुटभासः समोदयाः। दन्ताः शिखरिणो यस्या दीर्घं जीवति तत्प्रिय इति। पक्वं परिणतं बिम्बं बिम्बिकाफलमिवाधरोष्ठो यस्याः सा पक्वबिम्बाधरोष्ठी। शाकपार्थिवादित्वान्मध्यपदलोपिसमास इति वामनः। नासिकोदरोष्ठेत्यादिना ङीष्। मध्ये क्षामा कृशोदरीत्यर्थः। चकितहरिण्याः प्रेक्षणानीव प्रेक्षणानि दृष्टयो यस्याः सा तथोक्ता। एतेनास्याः पद्मिनीत्वं व्यज्यते। तदुक्तं रतिरहस्ये पद्मिनीलक्षणप्रस्तावे। चकितमृगदृशाभे प्रान्तरक्ते च नेत्रे इति। निम्ननाभिर्गम्भीरनाभिः। अनेन नारीणां नाभिगाम्भीर्यान्मदनातिरेक इति कामसूत्रार्थः सूच्यते। श्रोणीभारादलसगमना मन्द

श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां
या तत्र स्याद्युवतिविषये सृष्टिराद्येव धातुः॥ २१॥
तां जानीथाः परिमितकथां जीवितं मे द्वितीयं
दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम्।

गामिनी नतु जघनदोषात्। स्तनाभ्यां स्तोकनम्रा ईषदवनता नतु वपुर्दोषात्। युवतय एव विषय स्तस्मिन् युवतिविषये युवतीरधिकृत्येत्यर्थः। धातुर्ब्रह्मण आद्या सृष्टिः प्रथमशिल्पमिव स्थितेत्युत्प्रेक्षा। प्रथमनिर्म्मिता युवतिरिवेत्यर्थः। प्रायेण शिल्पिनां प्रथम तिर्म्माणे प्रयत्नातिशयवशाच्छिल्पनिर्म्माणसौष्ठवं दृश्यत इत्याद्यविशेषणम्। तथाचास्मिन् प्रपञ्चे न कुत्राप्येवंविधं रमणीयं रमणीरत्नेष्वस्तीति भावः। तदेवम्भूता या स्त्री तवान्तर्भवने स्यात् तामित्युत्तर श्लोकेन सम्बन्धः॥ २१॥

तामिति। सहचरे सहचारिणि अनेन वियोगासहिष्णुत्वं व्यज्यते मयि दूरीभूते दूरस्थिते सति सहचरे चक्रवाके दूरीभूते सति चक्रवाकीं चक्रवाकवधूमिव एकामेकाकिनीं स्थितां तां परिमितकथां मितभाषिणीं मे द्वितीयं जीवितं जानीथाः जीविततुल्यां मत्प्रेयसीमवगच्छेरित्यर्थः। तन्वी त्यादिपूर्व्वलक्षणैरिति शेषः। लक्षणानामन्यथाभा
[illegible]

गाढोत्कण्ठां गुरुषु दिवसेष्वेषु गच्छत्सु बालां
जातां मन्ये शिशिरमथितां पद्मिनीं वान्यरूपाम् ॥[२२]॥

नूनं तस्याः प्रबलरुदितोच्छूननेत्रं प्रियायाः
निश्वासानामशिशिरतया भिन्नवर्णाधरोष्ठम् ।

रुत्कण्ठाम् । रागे त्वलब्धविषये वेदना महती तु या । संशोषणी तु गात्राणां तामुत्कण्ठां विदुर्बुधा इत्यभिधानात् । बालां गुरुषु विरहमहत्सु एषु दिवसेषु गच्छत्सु वर्त्तमानेषु शिशिरेण शिशिरकालेन मथितां पद्मिनीं वा पद्मिनीमिव । इववद्वा यथा शब्दा इति दण्डी । अन्यरूपां पूर्वविपरीताकारां जातां मन्ये पद्मिनीवान्यादृशी जातेति तर्कयामीत्यर्थः । एतावता नेयमन्येति क्षमितव्यमिति भावः ॥ २२ ॥

नूनमिति । प्रबलरुदितेन उच्छूने उच्छूसिते नेत्रे यस्य तत् । उच्छूनेति श्वयतेः कर्त्तरि क्तः आदितश्चेति निष्ठानत्वं वचीस्वपीत्यादिना सम्प्रसारणं सम्प्रसारणाच्चेति पूर्वरूपत्वं हल इति दीर्घः । एतेन विषादो व्यज्यते निश्वासानामशिशिरतया अन्तस्तापोष्णत्वेन भिन्नवर्णो विच्छायोऽधरोष्ठो यस्य तत् हस्तेन्यस्तं हस्तन्यस्तम् एतेन चिन्ता व्यज्यते । लम्बालकत्वात्संस्काराभावाल्लम्बमानकुन्तलत्वादसकलस्यक्तिम्असम्पूर्णाभिव्यक्ति तस्याः प्रियायाः मुखं

हस्तन्यस्तं मुखमसकलव्यक्ति लम्बालकत्वा
दिन्दोर्दैन्यं त्वदनुसरणक्लिष्टकान्तेर्बिभर्त्ति ॥ २३ ॥
आलोके ते निपतति पुरा सा बलिव्याकुला वा
मत्सादृश्यं विरहतनु वा भावगम्यं लिखन्ती ।

त्वदनुसरणेन त्वदुपरोधेन मेघानुसरणेनेति यावत् । क्लिष्टकान्तेरिन्दोर्दैन्यं शोच्यतां बिभर्त्ति नूनमिति वितर्के । नूनं तर्केऽर्थनिश्चय इत्यमरः । पूर्ववत्तथापि न भ्रमितव्यमिति भावः ॥ २३ ॥

सर्व्वविरहिणीसाधारणानि लक्षणानि सम्भावनयोत्प्रेक्ष्यणीत्याह आलोक इत्यादिभिस्त्रिभिः ।

आलोक इति । हे मेघ सा मत्प्रिया बलिषु नित्येषु प्रोषितार्थेषु च देवताराधनेषु व्याकुला व्यापृता वा विरहेण तनु कृशं भावगम्यं मत्कायस्य दृष्टचरत्वात्स्मृति सम्भावनयोत्प्रेक्ष्यमित्यर्थः मत्सादृश्यं मदाकारसाम्यं मत्प्रतिकृतिमित्यर्थः । यद्यपि सादृश्यं नाम प्रसिद्धवस्त्वन्तरगतमाकारसाम्यं तथापि प्रतिकृतित्वेन विवक्षितम् इतरथालेख्यत्वासम्भवात् आलेख्येऽपि च सादृश्यमित्यभिधानात् । लिखन्ती कचित् फलकादौ विन्यस्यन्ती वा । चित्रदर्शनस्य विरहिणीविनोदोपायत्वादिति भावः । एतच्च कामशास्त्रसंवादेन सम्यग्विवेचितमस्माभीरघुवंशसञ्जीवन्याम साटश्यप्रतिकतिदर्शनैः प्रियाया इत्यत्र । अ

पृच्छन्ती वा मधुरवचनां सारिकां पञ्जरस्थां
कच्चिद्भर्त्तुः स्मरसि रसिके त्वं हि तस्य प्रियेति ॥२४॥
उत्सङ्गे वा मलिनवसने सौम्य निक्षिप्य वीणां
मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा ।

धुरवचनां मञ्जुभाषिणीम् अतएव पञ्जरस्थां हिं
स्रेभ्य कृतसंरक्षणामित्यर्थः सारिकां स्त्रीपक्षिविशेषं
हे रसिके भर्त्तुः स्वामिनः स्मरसि कच्चित् स्मरसि
किम् । कच्चित्कामप्रवेदने इत्यमरः । भर्त्तारं स्म
रसि किमित्यर्थः । अधीगर्थदयेशां कर्म्मणीति
कर्म्मणि षष्ठी । स्मरणे कारणमाह हि यस्मात्
कारणात् त्वं तस्य भर्त्तुः प्रीणातीति प्रिया । इगुप
धज्ञा प्रीकिर इति कप्रत्ययः । अतः प्रेमास्पदत्वात्
स्मर्त्तुमर्हसीति भावः । इत्येवं पृच्छन्ती वा । वाश
ब्दो विकल्पे । उपमायां विकल्पे वेत्यमरः । ते
तवालोके दृष्टिपथे पुरा निपतति सद्यो निपतिष्य
तीत्यर्थः । स्यात् प्रबन्धे पुरातीते निकटागामिके
पुरेत्यमरः । यावत् पुरानिपातयोर्लडिति, लट्
॥ २४ ॥

उत्सङ्ग इति । हे सौम्य साधो मलिनवसने ।
प्रोषिते मलिना कर्षति शास्त्रादित्यर्थः । उत्सङ्गे ऊ
रौ वीणां निक्षिप्य मम गोत्रं नाम अङ्कश्चिह्नं यस्मिं
[illegible]

तन्त्रीमार्द्रां नयनसलिलैः सारयित्वा कथञ्चिद्
भूयोभूयः स्वयमपि कृतां मूर्च्छनां विस्मरन्ती ॥ २५ ॥

शेषान्मासान् विरहदिवसस्थापितस्यावधेर्वा
विन्यस्यन्ती भुवि गणनया देहलीदत्तपुष्पैः ।

चेत्यमरः। विरचितानि पदानि यस्य तत्तथोक्तं गेयं गानार्हं प्रबन्धादि गीतमिति पाठे स एवार्थः। उद्गातुमुच्चैर्गातुं कामो यस्याः सा। तुम् काममनसोरिति मकारलोपः। देवयोनित्वाद्गान्धारग्रामं गातुकामेत्यर्थः। तदुक्तं षड्जमध्यमनामानौ ग्रामौ गायन्ति मानवाः। नतु गान्धारनामानं स लभ्यो देवयोनिभिरिति। तथा नयनसलिलैः प्रियतमस्मृतिजनितैरश्रुभिरार्द्रां तन्त्रीं कथञ्चित् कृच्छ्रेण सारयित्वा आर्द्रस्वात्कारेण प्रमृज्य अन्यथा क्वणनासम्भवादिति भावः। भूयोभूयः पुनः पुनः स्वयमात्मना कृतामपि विस्मरणानर्हामपीत्यर्थः मूर्च्छनां स्वरारोहावरोहक्रमम्। स्वराणां स्थापनाः सप्ताः मूर्च्छनाः सप्त सप्त हीति सङ्गीतरत्नाकरे। विस्मरन्ती वा। आलोके ते निपततीति पूर्वेणान्वयः ॥ २५ ॥

शेषानिति। विरहस्य दिवसस्तस्मात् स्थापितस्य तत आरभ्य निश्चितस्यावधेरन्तस्य शेषान् गतशिष्टान्मासान् देहलीदत्तपुष्पैः देहली द्वारशाखाधा

मत्सङ्गं वा हृदयनिहितारम्भमास्वादयन्ती
प्रायेणैते रमणविरहेष्वङ्गनानां विनोदाः ॥ २९ ॥

कुलकम्।

स्निग्धां सख्यः क्षणमपि दिवा तां न मोक्ष्यन्ति तन्वी
मेकप्रख्या भवति हि जगत्यङ्गनानां प्रवृत्तिः ।
स त्वं रात्रौ जलद शयनासन्नवातायनस्थः
कान्तां सुप्ते सति परिजने वीतनिद्रामुपेयाः ॥ ० ॥

राशीकृतत्वेन निहितानि यानि पुष्पाणि तैर्गणनया एकोद्वावित्यादिसंख्यानेन भुवि भूतले विन्यस्यन्ती वा पुष्पविन्यासैर्मासान् गणयन्तीवेत्यर्थः। हृदये निहितो मनसि सङ्कल्पितः आरम्भ उपक्रमो यस्य तम् अथवा हृदयनिहिता आरम्भाश्चुम्बनादयो व्यापारा यस्मिंस्तं मत्सङ्गं मत्सम्भोगरतिमास्वादयन्ती वा। आलोके ते इतिपूर्व्वेण सम्बन्धः। ननु कथमयं निश्चय इत्याशङ्कामर्थान्तरन्यासेन परिहरति प्रायेण बाहुल्येन अङ्गनानां रमणविरहेष्वेते पर्वौक्ताः विनोदाः कालयापनोपायाः। एतेन सङ्कल्पावस्था उक्ता तदुक्तम्। सङ्कल्पो नाथ विषये मनोरथ उदाहृत इति। त्रिभिः कुलकम् ॥ २९ ॥

सव्यापारामिति। हे सखे अहनि दिवसे सव्यापारां पूर्वोक्तबलिचित्रलेखनादिव्यापारवतीं ते सखीं स्वप्रियां मद्वियोगो मद्विरहस्तथा तेन प्रकारेण

सव्यापारामहनि न तथा पीडयेन्मद्वियोगः
शङ्के रात्रौ गुरुतरशुचं निर्विनोदां सखीं ते।
मत्सन्देशैः सुखयितुमलं पश्य साध्वीं निशीथे
तामुन्निद्रामवनिशयनां सौधवातायनस्थः॥ २७॥
आधिक्षामां विरहशयने सन्निषण्णैकपार्श्वां
प्राचीमूले तनुमिव कलामात्रशेषां हिमांशोः।

प्रकारे गुणवचनस्येति थाच्प्रत्ययः। न पीडयेत् यथा रात्राविति शेषः। किन्तु रात्रौ निर्विनोदां निर्व्यापारां ते सखीं गुरुतरा शुक् यस्यास्तां गुरुतरशुचमतिदुःखां शङ्के तर्कयामि। शङ्का वितर्कभययोरिति शब्दार्णवे। अतो निशीथेऽर्द्धरात्रे उन्निद्रामुत्सृष्टनिद्राम् अवनिरेव शयनं शय्या यस्यास्तां नियमार्थं स्थण्डिलशायिनीं साध्वीं पतिव्रताम्। साध्वी पतिव्रतेत्यमरः। अतो नान्यथा शङ्कितव्यमिति भावः। तां त्वत्सखीं मत्सन्देशैर्मद्वार्त्ताभिः अलंपर्य्याप्तं सुखयितुमानन्दयितुं सौधवातायनस्थः सन् पश्य। सखा धात्री च पितरौ चित्रदूतशुकादयः। सुखयन्तीष्टकथनसुखोपायैर्वियोगिनीमिति रत्नाकरे। दूतस्यायं मेघ इति भावः। अनेन जागरावस्थोक्ता॥ २७॥

पुनस्तामेव विशिनष्टि चाधिक्षामामिति चतुर्भिः आधीति। आधिना मनोव्यथया क्षामां कृशाम्।

नीता रात्रिः क्षण इव मया सार्द्धमिच्छारतैर्या
तामेवोष्णैर्विरहमहतीमश्रुभिर्यापयन्तीम्॥ २८॥
पादानिन्दोरमृतशिशिरान् जालमार्गप्रविष्टान्
पूर्व्वप्रीत्या गतमभिमुखं सन्निवृत्तं तथैव।

पुंस्याधिर्मानसी व्यथेत्यमरः। क्षायतेः कर्त्तरि क्तः। क्षायोम इति निष्ठा तकारस्य मकारः। विरहे शयनं तस्मिन् विरहशयने पल्लवादिरचित इत्यर्थः सन्निषण्णमेकं पार्श्वं यस्यास्तां प्राच्याः पूर्व्वस्यादिशो मूले उदयप्रान्ते इत्यर्थः। प्राचीग्रहणं क्षीणावस्थाद्योतनार्थम्। कलामात्रं कलैव शेषो यस्यास्तां हिमांशोः तनुं मूर्त्तिमिव स्थिताम्। तथा या रात्रिर्मया सार्द्धमिच्छया कृतानि रतानि तैः। शाकपार्थिवादित्वान्मध्यमपदलोपि समासः। क्षण इव नीता यापिता तामेव रात्रिं विरहेण महतीं महत्त्वेन प्रतीयमानाम् उष्णैरश्रुभिर्यापयन्तीम्। यातेर्ण्यन्तात्छटप्रत्ययः। अर्त्तिह्रीत्यादिना पुगागमः। स एव कालः सुखिनामल्पः प्रतीयते दुःखिनान्तु विपरीत इति भावः। एतेन कार्श्यावस्थोक्ता॥ २८॥

पादानिति। जालमार्गप्रविष्टान् गवाक्षविवरगतान् अमृतशिशिरान् इन्दोः पादान् रश्मीन् पूर्व्वप्रीत्या पूर्व्वस्नेहेन पूर्व्ववदानन्दकराभविष्यन्तीति बुद्धेरति भावः। अभिमुखं यथातथा गतं तथैव

चक्षुः खेदात्सलिलगुरुभिः पक्ष्मभिश्छादयन्तीं
साभ्रेऽह्नीव स्थलकमलिनीं न प्रबुद्धां न सुप्ताम् ॥२९॥
अन्वेष्टव्यामवनिशयने सन्निकीर्णैकपार्श्वां
तत्पर्यङ्कप्रगलिततवैश्छिन्नहारैरिवास्रैः।
भूयो भूयः कठिनविषमां सारयन्तीं कपोला-
दामोक्तव्यामयमितनखेनैकवेणीं करेण ॥३०॥
निश्वासेनाधरकिशलयक्लेशिना विक्षिपन्तीं
शुद्धस्नानात् परुषमलकं नूनमागण्डलम्बम्।

सन्निवृत्ते तदा तेषामतीव दुःसहत्वादिति भावः। चक्षुर्दृष्टिः खेदात् सलिलगुरुभिरश्रुदुर्भरैः पक्ष्मभिः छादयन्तीम् अतएव साभ्रे दुर्दिनेऽह्नि दिवसे न प्रबुद्धां मेघावरणादविकसितां न सुप्तामसुकुलिताम् उभयत्रापि नञर्थस्य न शब्दस्य सुप्सुपेति समासः। स्थलकमलिनीमिव स्थिताम्। एतेन विषयद्वेषः षष्ठी दशा सूचिता ॥ २९ ॥

निश्वासेनेति। शुद्धस्नानात्तैलादिरहितस्नानात् परुषं कठिनस्पर्शं नूनम् आगण्डलम्बम्। सुप्सुपेति समासः। अलकं चूर्णकुन्तलान्। जातावेकवचनम्। अधरकिसलयं क्लेशयति क्लिश्नातीति वा तेन तथोक्तेन उष्णेनेत्यर्थः। ताच्छील्ये णिनिः। निश्वासेन विक्षिपन्तीं चालयन्तीं तथा स्वप्नजोपि स्वप्नावस्थाजन्योपि साक्षात्सम्भोगासम्भवादिति

मत्सम्भोगः कथमुपनयेत् स्वप्नजोऽपीति निद्रा
माकांक्षन्तीं नयनसलिलोत्पीडरुद्धावकाशाम् ॥३०॥
आद्ये बद्धा विरहदिवसे या शिखा दाम हित्वा
शापस्यान्ते विगलितशुचा तां मयोद्वेष्टनीयाम्।
स्पर्शक्लिष्टामयमितनखेनासकृत्सारयन्तीं
गण्डाभोगात्कठिनविषमामेकवेणीं करेण ॥ ३१ ॥

भावः। मत्सम्भोगः कथं केन प्रकारेणोपनयेदाग
च्छेदित्याशयेनेति शेषः। प्रार्थनायां लिङ्। इति
नयनसलिलोत्पीडेनाश्रुप्रवृत्त्या रुद्धावकाशामाक्रा
न्तावस्थानां दुर्लभामित्यर्थः निद्रामाकाङ्क्षन्तीं स्नेहा
तुरत्वादिति भावः। अत्राश्रुविसर्ज्जनेन लज्जा
त्यागो व्यज्यते ॥ ३० ॥

आद्य इति। आद्ये विरहदिवसे दाम मालां
हित्वा त्यक्त्वा या शिखा बद्धा ग्रथिता शापस्यान्ते
विगलितशुचा वीतशोकेन मयोद्वेष्टनीयां मोचनीयां
स्पर्शक्लिष्टां स्पर्शे सति मूलकेशेषु सव्यथामित्यर्थः।
कठिनां चासौ विषमा च ताम्। खञ्जकुब्जादिव
दन्यतरस्य प्राधान्यविवक्षया विशेषणं विशेष्येण
बहुलमिति समासः। एकवेणीमेकीभूतवेणीम्।
पूर्वकालेत्यादिना तत्पुरुषः। तां शिखाम् अय
मिता नखा यस्य तेन करेण गण्डाभोगात् कपोल
विस्तरादसकृन्मुहुर्मुहुः सारयन्तीम् अपसारय

सा सन्न्यस्ताभरणमबला पेशलं धारयन्ती
शय्योत्सङ्गे निहितमसकृद्दुःखदुःखेन गात्रम्।
त्वामप्यस्रं नवजलमयं मोचयिष्यत्यवश्यं
प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मा॥ ३२॥
जाने सख्यास्तव मयि मनः सम्भृतस्नेहमस्मा
दित्थम्भूतां प्रथमविरहे तामहं तर्कयामि।

न्तीम्। तां पश्येति पूर्वेण सम्बन्धः। असकृत्सा रणाच्चित्तविभ्रमदशा सूचिता॥ ३१॥

सेति। अबला दुर्बला संन्यस्ताभरणं कृशत्वात्परित्यक्ताभरणम् असकृदनेकशो दुःखदुःखेन दुःखप्रकारेण। प्रकारे गुणवचनस्येति द्विर्भावः। शय्योत्सङ्गे निहितं पेशलं मृदुलं गात्रं शरीरं धारयन्ती वहन्ती। अनेनात्यन्ताशक्त्या मूर्च्छावस्था सूच्यते। सा त्वत्सखी त्वामपि नवजलमयं नवाम्बुरूपमस्रं वाष्पम् अवश्यं सर्वथा मोचयिष्यति। पचादित्वाद्द्विकर्म्मकत्वम्। तथाहि प्रायः प्रायेणार्द्रान्तरात्मा मृदुहृदयः मेघस्तु द्रवान्तःशरीरः। सर्वः करुणा करुणामयी वृत्तिरन्तःकरणवृत्तिर्य्यस्य सः करुणार्द्रवृत्तिर्भवति॥ ३२॥

नन्वीदृशीं दशामापन्नेति कथं त्वया निश्चितमत आह

जान इति। हे मेघ तव सख्यामनो मयि सम्भृतस्नेहं सञ्चितानुरागं जाने अस्मात् स्नेहात्

वाचालं मां न खलु सुभगम्मन्यभावः करोति
प्रत्यक्षन्ते निखिलमचिरात् भ्रातरुक्तं मया यत् ॥३३॥
रुद्धापाङ्गप्रसरमलकैरञ्जनस्नेहशून्यं
प्रत्यादेशादपि च मधुनोविस्मृतभ्रूविलासम्।

नकारणात् प्रथमविरहे। प्रथमग्रहणं दुःखातिशयार्थम्। तां त्वत्सखीमित्यम्भूतां पूर्वोक्तावस्थया भूतां तर्कयामि। ननु सुभगमानितामेष स्वभावो यदात्मनि स्त्रीणामनुरागप्रकटनं तत्राह वाचालमिति। सुभगमात्मानं मन्यत इति सुभगम्मन्यः। आत्ममाने खश् चेति खश्प्रत्ययः। अरुर्द्विषदित्यादिना मुमागमः। तस्य भावः सुभगम्मन्यभावः सुभगमानित्वं मां वाचाल बहुभाषिणं न करोति खलु सौन्दर्य्याभिमानितां न प्रकटयामीत्यर्थः। स्याज्जल्पकस्तु वाचलोवाचाटोबहुगर्ह्यवागित्यमरः। आलजाटचौ बहुभाषिणीत्यालच्प्रत्ययः। किन्तु हे भ्रातर्मयोक्तं यदाधिक्षामामित्यादि तदखिलं सर्व्वमचिरात् शीघ्रमेव ते तव प्रत्यक्षं भविष्यतीति शेषः॥ ३३॥

रुद्धेति। अलकैरुद्धा अपाङ्गयोः प्रसरायस्य तत्तथोक्तम् अञ्जन स्नेहशून्यं स्निग्धाञ्जनरहितम् अपि च मधुनोमद्यस्य प्रत्यादेशान्निराकरणात् परित्यागादित्यर्थः। प्रत्यादेशो निराकृतिरित्यमरः।

त्वय्यासन्ने नयनमुपरिस्पन्दि शङ्के मृगाक्ष्याः
मीनक्षोभाच्चलकुवलयश्रीतुलामेष्यतीति ॥ ३४ ॥
वामश्चास्याः कररुहपदैर्मुच्यमानो मदीयै-
र्मुक्ताजालं चिरपरिचितं त्याजितो दैवगत्या।

विस्मृतो भ्रूविलासो भ्रूभङ्गी येन तत्। नयनस्य रुद्धापाङ्गप्रसरत्वादिकं विरहसमुत्पन्नमिति भावः। त्वय्यासन्ने सति स्वकुशलवार्त्ताशंसिनीति शेषः। उपर्य्यूर्द्धभागे स्पन्दते स्फुरतीत्युपरिस्पन्दि। तथाच निमित्तनिदाने। स्पन्दान्मूर्ध्नि क्षत्रलाभं ललाटे पट्टमंशुकम्। इष्टप्राप्तिं दृशोरूर्ध्वमपाङ्गे हानिमादिशेदिति। मृगाक्ष्यास्तत् सख्याः नयनं वाममिति शेषः। वामभागस्तु नारीणां पुंसां श्रेष्ठस्तु दक्षिणः। दाने देवादिपूजायां स्पन्देऽलङ्करणेऽपि चेति स्त्रीणां वामभागप्राशस्त्यात्। मीनक्षोभात् मीनचलनाच्चलस्य कुवलयस्य श्रियाः शोभायाः तुलां सादृश्यमेष्यतीति शङ्के तर्कयामि ॥ ३४ ॥

वाम इति। मदीयैः कररुहपदैर्नखपदैः। पुनर्भवः कररुहो नखोऽस्त्री नखरोऽस्त्रियामित्यमरः। मुच्यमानः परिहीयमाणः नखाङ्करहित इत्यर्थः। चिरपरिचितं चिराभ्यस्तं मुक्ताजालं मौक्तिकसरमयं कटिभूषणं दैवगत्या दैववशेन त्याजितः। सम्प्रति नखपदोष्माभावेन शीतोपचारस्य तस्य वैय-

सम्भोगान्ते मम समुचितो हस्तसंवाहनानां
यास्यत्यूरुः सरसकदलीस्तम्भगौरश्चलत्वम् ॥ ३५ ॥
तस्मिन् काले जलद यदि सा लब्धनिद्रासुखा स्या-
दन्वास्यैनां स्तनितविमुखो याममात्रं सहस्व।

र्थ्यादिति भावः। त्यजतेर्ण्यन्तात् कर्म्मकर्त्तरि क्तः। पचादित्वात् द्विकर्म्मकत्वम्। सम्भोगान्ते मम हस्तसंवाहनानां हस्तेन मर्द्दनानाम्। संवाहनं मर्द्दनं स्यादित्यमरः। समुचितोयोग्यः सरसो रसार्द्रः परिपक्वो न शुष्कश्च विवक्षितः तत्रैव पाण्डिमसम्भवात्। स चासौ कदलीस्तम्भश्च स इव गौरः पाण्डुरः। गौरः करीरे सिद्धार्थे शुक्ले पीतेऽरुणेपि चेति मालतीमालायाम्। अस्याः प्रियायाः वाम ऊरुश्चलत्वं स्पन्दनं यास्यति प्राप्स्यते। ऊरोः स्पन्दाद्रतिं विन्द्यादूर्वोः प्राप्तिं सुवाससः इति निमित्त निदाने ॥ ३५ ॥

तस्मिन्निति। हे जलद तस्मिन् काले त्वदुपसर्पणकाले सा मत्प्रिया लब्धं निद्रासुखं यया तादृशी स्याद्यदि स्याच्चेत् एनां निद्राणामन्वास्य पश्चादासित्वेत्यर्थः। उपसर्गवशात्सकर्म्मकत्वम्। स्तनितविमुखोगर्ज्जितपराङ्मुखोनिःशब्दः सन् अन्यथा निद्राभङ्गः स्यादिति भावः। याममात्रं प्रहरमात्रम्। द्वौ यामप्रहरौ समावित्यमरः। सहस्व

माभूदस्याः प्रणयिनि मयि स्वप्नलब्धे कथञ्चित्
सद्यः कण्ठच्युतभुजलताग्रन्थि गाढ़ोपगूढ़म् ॥ ३६ ॥
तामुत्थाप्य स्वजलकणिकाशीतलेनानिलेन
प्रत्याश्वस्तां सममभिनवैर्जालकैर्मालतीनाम् ।

प्रतीक्षस्व । प्रार्थनायां लोट् । शक्तयोरेकवार सुरतस्य यामावधिकत्वात् स्वप्नेऽपि तथाऽभवितव्य मित्यभिप्रायः । तथाच रतिसर्वस्वे । एकवारा वधिर्यामो रतस्य परमोमतः । चन्द्रशक्तिमतोर्यू नोरद्भुतक्रमवर्त्तिनोरिति । यामसहनस्य प्रयोज नमाह मा भूदिति । अस्याः प्रियायाः प्रणयिनि प्रेयसि मयि कथञ्चित् कृच्छ्रेण स्वप्नलब्धे सति गा ढ़ोपगूढ़ं गाढ़ालिङ्गनम । नपुंसके भावे क्तः । सद्यस्तत्क्षणं कण्ठात् च्युतः भुजलतयोर्ग्रन्थिर्बन्धो यस्य तन्माभूत् मास्तु कथञ्चिल्लब्धालिङ्गनस्य वि घातो मा भूदित्यर्थः । नचात्र निद्रोक्तिस्तामुन्नि द्रामिति पूर्व्वोक्तेन विरुध्यते पुनः सप्तम्याद्यवस्थासु पाक्षिकनिद्रासम्भवात् । तथा च रसरत्नाकरे । आसक्ती रोदनं निद्रा निर्ज्ज्ञानर्थवागभ्रमः । सप्त मादिषु जायन्ते दशाभेदेषु वासुके इति ॥ ३६ ॥

तामिति । तां प्रियां स्वस्य जलकणिकाभिर्जल विन्दुभिः शीतलेनानिलेनोत्थाप्य प्रबोध्य । एतेन तस्याः प्रभत्वाद्व्यजनानिलसमाधिर्व्यज्यते । यथाह

विद्युद्गर्भः स्तिमितनयनांत्वत्सनाथे गवाक्षे
वक्तुं धीरः स्तनितवचनैर्मानिनीं प्रक्रमेथाः ॥ ३७ ॥

भोजराजः। मृदुभिर्मर्दनैः पादे शीतलैर्व्यंजनैः स्तनौ। श्रुतौ च मधुरैर्गीतैर्निद्रातोबोधयेत् प्रभुमिति । अभिनवैर्मालतीनां जालकैः समं जातोमुकुलैः सह । सुमनामालती जातिरिति। साकं सत्रासमं सहेति । क्षारको जालकं क्लीवे कलिका कोरकः पुमानिति चामरः । प्रत्याश्वस्तां सुस्थिताम् । अन्यत्र पुनरुच्छ्वसिताम्। श्वसेः कर्त्तरि क्तः। एतेनास्याः सौकुमार्य्यं गम्यते। त्वत्सनाथे त्वत्सहिते। गवाक्षे स्तिमितनयनां कोऽसाविति विस्मयान्निश्चलनेत्रां मानिनीं मनस्विनीं जनानौचित्यासहिष्णुमित्यर्थः। विद्युत् गर्भा अन्तःस्था यस्य स विद्युद्गर्भः अन्तर्लीनविद्युत्क इत्यर्थः। गर्भोपवरकेऽन्तःस्थे गर्भोऽग्नौ कुक्षिणोऽर्भके इति शब्दार्णवः। दृष्टिप्रतिघातेन वक्तुर्मुखावलोकनप्रतिबन्धकत्वान्न विद्युता द्योतितव्यमिति भावः। धीरो धैर्य्यविशिष्टश्च सन् अन्यथाभीजत्वादिनैतदनाश्वासनप्रसङ्गादिति भावः। स्तनितवचनैः स्तनितान्येव वचनानि तैर्वक्तुं प्रक्रमेथा उपक्रमस्व। विध्यर्थे लिङ्। प्रोपाभ्यामित्यात्मनेपदम्॥ ३७ ॥

सम्प्रति दूतस्य श्रोतृजनाभिमुखीकरणाचातुरीमुपदिशति

भर्त्तुर्मित्रं प्रियमविधवे विद्धि मामम्बुवाहं
तत्सन्देशैर्हृदयनिहितैरागतं त्वत्समीपम् ।
यो वृन्दानि त्वरयति पथि श्राम्यतां प्रोषितानां
मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि ॥ ३८॥
इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा
त्वामुत्कण्ठोच्छ्वसितहृदया वीक्ष्य सम्भाव्य चैवम् ।

भर्त्तुरिति । विधवा गतभर्तृका न भवतीति अविधवा सभर्तृका हे अविधवे । अनेन भर्तृजीवन सूचनादनिष्टाशङ्कां वारयति । मां तव भर्त्तुः प्रियं मित्रं प्रियसुहृदं तवापि हृदयनिहितैर्मनसि स्थापितैस्तत्सन्देशैस्तस्य भर्त्तुः सन्देशैस्त्वत्समीपमागतं भर्त्तुः सन्देशकथनार्थमागतमित्यर्थः । अम्बुवाहं मेघं विद्धि जानीहि । न केवलमहं वार्त्ताहरः किन्तु घटकोऽपीत्याशयेनाह योऽम्बुवाहोमन्द्रस्निग्धैः स्निग्धगम्भीरैः ध्वनिभिः करणैः अबलानां स्त्रीणां वेणयस्तासां मोक्षे मोचने उत्सुकानि पथि श्राम्यतां श्रान्तिमापन्नानां प्रोषितानां प्रवासिनां पान्थानामित्यर्थः वृन्दानि सङ्घान् त्वरयति । पान्थोपकारिणो मे किमु वक्तव्यं सुहृदुपकारित्वमिति भावः ॥ ३८ ॥

भर्तृसख्यादिज्ञापनस्य फलमाह

इतीति । इत्येवमाख्याते पवनतनयं हनूमन्तं मैथिली सीतेव सा मत्प्रिया उन्मुखी उत्कण्ठया

श्रोष्यत्यस्मात्परमवहिता सौम्य सीमन्तिनीनां
कान्तोदन्तः सुहृदुपनतः सङ्गमात्किञ्चिदूनः ॥ ३८ ॥

तामायुष्मन्मम च वचनादात्मनश्चोपकर्त्तुं
ब्रूयादेवं तव सहचरो रामगिर्य्याश्रमस्थः।

औत्सुक्येन उच्छ्वसितहृदया विकसितचित्ता च सती त्वां वीक्ष्य सम्भाव्य सत्कृत्य अस्मात् भर्त्तुर्मैत्रीज्ञापनात्परं सर्व्वं श्रोतव्यम् अवहिता अप्रमत्ता सती श्रोष्यति च। अत्र सीताहनूमदुपाख्यानादस्याः पातिव्रत्यं मेघस्य दूतगुणसम्पत्तिश्च व्यज्यते। तदुक्तं रसाकरे। ब्रह्मचारी बली धीरो मायावी मानवर्ज्जितः। धीमानुदारो निःशङ्को वक्ता दूतः स्त्रियां भवेदिति। ननु वार्त्तामात्रश्रवणादस्याः को लाभ इत्याशङ्क्यार्थान्तरमुपन्यस्यति। हे सौम्य साधो सीमन्तिनीनां बधूनाम्। नारी सीमन्तिनी बधूरित्यमरः। सुहृदा सुहृन्मुखेनोपनतः प्राप्तः। सुहृत्पदं विप्रलम्भशङ्कानिवारणार्थम्। कान्तस्योदन्तो वार्त्ता कान्तोदन्तः। वार्त्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यादित्यमरः। सङ्गमात् कान्तसम्पर्कात् किञ्चिदूनः ईषदूनः तद्वदेवानन्दकारीत्यर्थः ॥ ३८ ॥

सम्प्रति सन्दिशति

तामिति। हे आयुष्मन् प्रशंसायां मतुप्। परोपकारश्लाघ्यजीवितेत्यर्थः। मम वचनं प्रार्थनाव

अव्यापन्नः कुशलमबले पृच्छति त्वां वियुक्तः
पूर्व्वाभाष्यं सुलभविपदां प्राणिनामेतदेव ॥४०॥
अङ्गेनाङ्गं प्रतनु तनुना गाढतप्तेन तप्तं
सास्रेणाश्रुद्रुतमविरतोत्कण्ठमुत्कण्ठितेन।

चनं तस्माच्च आत्मनः स्वस्योपकर्त्तुञ्च परोपकारेणात्मानं कृतार्थयितुमित्यर्थः। उपकारक्रियां प्रति कर्मत्वेपि तस्यानुकरोतीत्यादिवत्सम्बन्धमात्रविवक्षायामात्मन इति षष्ठी न विरुध्यते। यथाह भारविः। सा लक्ष्मीरुपकुरुते यया परेषामिति। तथा श्रीहर्षस्य। साधूनामुपकर्त्तुं लक्ष्मीं द्रष्टुं विहायसा गन्तुमिति। तां प्रियामेवं ब्रूयात् भवानिति शेषः। किमित्याह हे अबले तव सहचरो भर्त्ता रामगिरेश्चित्रकूटस्याश्रमेषु तिष्ठतीति रामगिर्य्याश्रमस्थः सन्नव्यापन्नः न मृतः। अमरणे हेतुमाह वियुक्तोवियोगं प्राप्तो दुःखी सन् त्वां कुशलं पृच्छति। दुह्यादित्वात् पृच्छतेर्द्विकर्मकत्वम्। तथाहि सुलभविपदामयत्नसिद्धविपत्तीनां प्राणिनाम् एतदेव कुशलमेव पूर्व्वाभाष्यम् एतदेव प्रथममवश्यं प्रष्टव्यम्। कृत्यास्चेत्यावश्यकार्थे ण्यत्प्रत्ययः॥ ४०॥

अङ्गेनेति। किञ्च दूरवर्त्ती दूरस्थः। नचागन्तुं शक्यतइत्याह वैरिणा विरोधिना विधिना दैवेन

उष्णोच्छ्वासं समधिकतरोच्छ्वासिना दूरवर्त्ती
सङ्कल्पैस्तैर्विशति विधिना वैरिणा रुद्धमार्गः॥ ४१॥
शब्दाख्येयं यदपि किल ते यः सखीनां पुरस्तात्
कर्णे लोलः कथयितुमभूदाननस्पर्शलोभात्।

रुद्धमार्गः प्रतिबद्धवर्त्मा स ते सहचरः तनुना कृशेन गाढतप्तेनात्यन्तसन्तप्तेन सास्रेण साश्रुणा उत्कण्ठा वेदना अस्य जाता उत्कण्ठितः तेनोत्कण्ठितेन। तदस्य सञ्जातमित्यादिना इतच्प्रत्ययः। उत्कण्ठतेर्वा कर्त्तरि क्तः। समधिकतरमधिकमुच्छ्वसितीति समधिकरोच्छ्वासी तेन दीर्घनिश्वासिनेत्यर्थः। अङ्गेन स्वशरीरेण प्रतनु कृशं तप्तं सन्तप्तमश्रुद्रुतमश्रुक्लिन्नम्। अश्रु नेत्राम्बुरोदनञ्चास्रमस्तु चेत्यमरः। अविरतोत्कण्ठमविच्छिन्नवेदनम् उष्णोच्छ्वासं तीव्रनिश्वासम्। तिग्मं तीव्रं खरं तीक्ष्णं चण्डमुष्णं समं स्मृतमिति हलायुधः। अङ्गं त्वदीयं तैः स्वसंवेद्यैः सङ्कल्पैर्मनोरथैर्विशत्येकीभवतीत्यर्थः। अत्र समरागित्वद्योतनाय नायकेन नायिकायाः समानावस्थत्वमुक्तम्॥ ४१॥

सम्प्रति स्वावस्थानिवेदनाय प्रस्तौति

शब्दाख्येयमिति। हे अबले यस्ते प्रियः सखीनां पुरस्तादग्रे आननस्पर्शे त्वन्मुखसम्पर्के लोभात् शब्दाख्येयं शब्देन रवेणाख्येयम् उच्चैर्वाच्यमपि यत्

सोऽतिक्रान्तः श्रवणविषयं लोचनाभ्यामदृष्ट
स्त्वामुत्कण्ठाविरचितपदं मन्मुखेनेदमाह ॥ ४२ ॥

श्यामास्वङ्गं चकितहरिणीप्रेक्षणे दृष्टिपातं
वक्त्रच्छायां शशिनि शिखिनां बर्हभारेषु केशान्।

तद्वचनमपीति शेषः। कर्णे कथयितुं लोलो लाल सोऽभूत् किल। लोलुपो लोलभो लोलो लालसो लम्पटोऽपि चेति यादवः। श्रवणविषयं कर्णपथम् अतिक्रान्तः तथा लोचनाभ्यामदृष्टः। अतिदूरत्वात् द्रष्टुं श्रोतुञ्च न शक्य इति भावः। स ते प्रियः त्वाम् उत्कण्ठया विरचितानि पदानि सुप्तिङन्त शब्दाः वाक्यानि वा यस्य तत्तथोक्तम्। पदं शब्दे च वाक्ये चेति विश्वः। इदं वक्ष्यमाणं मन्मुखेनाह मन्मुखेन स एव ब्रूते इत्यर्थः॥ ४२ ॥

सादृश्यप्रतिकृतिस्वप्नदर्शनतदङ्गस्पृष्टस्पर्शाख्यानि चत्वारि विरहिणां विनोदस्थानानि तथाचोक्तं पताकायाम्। वियोगावस्थासु प्रियजनसदृक्षानुभवनं ततश्चित्रं कर्म्म स्वपनसमये दर्शनमपि। तदङ्ग स्पृष्टानामुपनतवतां दर्शनमपि प्रतीकारोऽनङ्गव्य थितमनसां कोऽपि गदित इति। तत्र सदृशवस्तु दर्शनमाह।

श्यामास्विति। श्यामासु प्रियङ्गुलतासु। श्यामा तु महिलाह्वया लता गोवन्दनी गुन्द्रा प्रियङ्गुः

उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान्
हन्तैकस्मिन् क्वचिदपि न ते चण्डि सादृश्यमस्ति ॥४३॥

फलिनी फलीत्यमरः । अङ्गं शरीरमुत्पश्यामि सौकुमार्य्यादिसाम्यादङ्गमिति तर्कयामीत्यर्थः । तथा चकितहरिणीनां प्रेक्षणे दृष्टिपातं शशिनि चन्द्रे वक्त्रच्छायां मुखकान्तिं तथा शिखिनां वर्हिणां वर्हभारेषु वर्हसमूहेषु केशान् प्रतनुषु स्वल्पासु नदीनां वीचिषु । अत्र वीचीनां विशेषणोपादानेन नानुक्तगुणग्रहो दोषः भ्रूसाम्यनिर्वाहाय महत्त्वदोषनिराकरणार्थत्वात्तस्येति । तदुक्तं रसरत्नाकरे । नानुत्पादे गुणोत्कर्षे भोगोक्तौ दोषवारणे । विशेषणादिदोषस्य नास्त्यनुक्तगुणग्रह इति । भ्रूविलासान् । भ्रूपताका इति पाठे भ्रुवः पताका इवेत्युपमितसमासः । उत्पश्यामीति सर्वत्र सम्बध्यते । तथापि नास्ति मनोनिर्वृतिरित्याशयेनाह हन्तेति हन्त विषादे । हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोरित्यमरः । हे चण्डि अतिकोपने । चण्डस्त्वत्यन्तकोपन इत्यमरः । गौरादित्वात् ङीष् । उपमानकथनमात्रेण न कोपितव्यमिति भावः । क्वचिदपि कस्मिन्नप्येकस्मिन् वस्तुनि ते तव सादृश्यं नास्त्यतो न निर्वृणोमीत्यर्थः । अनेनास्याः सौन्दर्य्यमनुपममिति व्यज्यते ॥ ४३ ॥

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया
मात्मानं ते चरणपतितं यावदिच्छामि कर्त्तुम्।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः॥४४॥

सम्प्रति प्रतिकृतिदर्शनमाह

त्वामिति। हे प्रिये प्रणयेन प्रेमातिशयेन कुपितां कुपितावस्थायुक्तां त्वां त्वत्प्रतिकृतिमित्यर्थः। धातवोगैरिकादयः। धातुर्वातादि शब्दादि गैरिकादिष्विति यादवः। ते एव रागा रञ्जकद्रव्याणि तैर्धातुरागैः शिलायां शिलापट्टे आलिख्य निर्माय आत्मानं मां मत्प्रतिकृतिमित्यर्थः ते तव चित्रगताया इत्यर्थः चरणपतितं कर्त्तुं तथा लेखितुं यावदिच्छामि तावदिच्छासमकालं मुहुरुपचितैः प्रवृद्धै रस्रैरश्रुभिः कर्त्तृभिः मे दृष्टिरालुप्यते आव्रियत इत्यर्थः। ततो दृष्टिप्रतिबन्धनाल्लेखनं प्रतिबध्यत इति भावः। क्रूरो घातुकः। नृशंसो घातुकः क्रूर इत्यमरः। कृतान्तो दैवम्। कृतान्तोयमसिद्धान्त दैवाकुशल कर्मस्वित्यमरः। तस्मिन्नपि चित्रेपि ना वावयोः। युष्मदस्मदोः षष्ठीचतुर्थी द्वितीयास्थयोर्वान्नाविति नावादेशः। सङ्गमं सहवासं न सहते। सङ्गमलेखनमप्यावयोरसहमानं दैवमावयोः सङ्गं न सहत इति किमु वक्तव्यमित्यपि शब्दार्थः॥४४

धारासिक्तस्थलसुरभिणस्त्वन्मुखस्यास्य बाले
दूरीभूतं प्रतनुमपि मां पञ्चवाणः क्षिणोति ।
घर्म्मान्तेऽस्मिन् विगणय कथं वासराणि व्रजेयु-
र्दिक्संसक्तप्रविततघनव्यस्तसूर्य्यातपानि ॥ ० ॥
मामाकाशप्रणिहितभुजं निर्द्दयाश्लेषहेतोः
लब्धायास्ते कथमपि मया स्वप्नसन्दर्शनेषु ।

अधुना स्वप्नदर्शनमाह

मामिति । सुप्तस्य विज्ञानं स्वप्नः । स्वप्नः सुप्तस्य विज्ञानमिति विश्वः । सन्दर्शनं सम्वित् । दर्शनं समये शास्त्रे दृष्टौ स्वप्नेऽक्षिण सम्बिदीति शब्दार्णवे । स्वप्नसन्दर्शनानि स्वप्नज्ञानानि चूतवृक्षादिवत्सामान्यविशेषभावेन सहप्रयोगः । तेषु मया कथमपि महता प्रयत्नेन लब्धाया गृहीताया दृष्टाया इति यावत् ते तव निर्द्दयाश्लेषोगाढ़ालिङ्गनं स एव हेतुस्तस्य निर्द्दयाश्लेषार्थमित्यर्थः । षष्ठी हेतुप्रयोग इति षष्ठी । आकाशे निर्विषये प्रणिहितभुजं प्रसारितबाहुं मां पश्यन्तीनां स्थलीदेवतानां मुक्ता मौक्तिकानीव स्थूलाः अश्रुलेशा बाष्पविन्दवस्तरुकिशलयेषु । अनेन चेलाञ्चले नाश्रुधारणासमाधिर्ध्वन्यते । बहुशो न पतन्तीति न किन्तु पतन्त्येवेत्यर्थः । निश्चये नञ्द्वयप्रयोगः । तथा चाधिकार

पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां
मुक्तास्थूलास्तरुकिशलयेष्वश्रुलेशाः पतन्ति ॥४५॥
भित्त्वा सद्यः किशलयपुटान् देवदारुद्रुमाणां
ये तत्क्षीरस्रुतिसुरभयो दक्षिणेन प्रवृत्ताः ।

महात्मगुरुदेवानामश्रुपातः क्षितौ यदि । देशभ्रंशो महादुःखं मरणञ्च भवेत् ध्रुवमिति क्षितौ देवताश्रुपातनिषेधदर्शनाद्यक्षस्य मरणाभावसूचनार्थं तरुकिशलयेषु पतन्तीत्युक्तम् ॥ ४५ ॥

इदानीं तदङ्गस्पृष्टवस्तुस्पर्शनमाह

भित्त्वेति । देवदारुद्रुमाणां किशलयपुटान् पल्लवपुटान् सद्योभित्त्वा तत्क्षीरस्रुतिसुरभयस्तेषां देवदारुद्रुमाणां क्षीरस्रुतिभिः क्षीरनिष्यन्दैः सुरभयः सुगन्धयः तुषाराद्रिजातत्वे लिङ्गमिदं ये वाता दक्षिणेन दक्षिणमार्गेण । तृतीयाभिधाने प्रकृत्यादिभ्य उपसंख्यानात् तृतीयासमेन यातीतिवत् तत्रापि करणत्वस्य प्रतीयमानत्वात् कर्तृकरणयोरेव तृतीयेति भाष्यकारः । प्रवृत्ताश्चलिताः हे गुणवति सौशील्य सौकुमार्य्यादि गुणसम्पन्ने ते तुषाराद्रिवाताः पूर्व्वं प्राक् एभिर्व्वातैस्तवाङ्गं स्पृष्टं भवेद्यदि किलेति सम्भावितमेतदिति बुद्ध्यर्थः वार्त्तासम्भाव्ययोः किलेत्यमरः । मया आलिङ्ग्यन्ते आश्लिष्यन्ते । वायूनां [illegible]

आलिङ्ग्यन्ते गुणवति मया ते तुषाराद्रिवाताः
पूर्व्वंस्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति ॥ ४६ ॥
संक्षिप्येत क्षण इव कथं दीर्घयामा त्रियामा
सर्व्वावस्थास्वहरपि कथं मन्दमन्दातपं स्यात् ।
इत्थं चेतश्चटुलनयने दुर्लभप्रार्थणं मे
गाढ़ोष्माभिः कृतमशरणं त्वद्वियोगव्यथाभिः ॥ ४७ ॥

इत्यभिधानं यक्षस्योन्मत्तत्वात् प्रलपितमित्यदोष इति वदन्निरुक्तकारः स्वयमेवोन्मत्तप्रलापीत्युपेक्षणीयः ॥ ४६ ॥

संक्षिप्येतेति । दीर्घा यामाः प्रहरा यस्यां सा दीर्घयामा विरहवेदनया तथा प्रतीयमानेत्यर्थः । त्रियामा रात्रिः । आद्यन्तयोरर्द्धयामयोर्दिनव्यवहारात् त्रियामेति क्षीरस्वामी । क्षण इव कथं केन प्रकारेण संक्षिप्येत लघूक्रियेत अहरपि सर्व्वावस्थासु सर्व्वकालेष्वित्यर्थः । मन्दमन्दो मन्दप्रकारः । प्रकारे गुणवचनस्येति द्विरुक्तिः । कर्म्मधारयवदुत्तरेष्विति कर्म्मधारयवद्भावात्सुपोलुक् । मन्दमन्दातपमत्यल्पसन्तापं कथं स्यात् । हे चटुलनयने चञ्चलाक्षि इत्थम् अनेन प्रकारेण दुर्लभप्रार्थनमप्राप्यमनोरथं मे मम चेतो गाढ़ोष्माभिरतितीव्राभिः त्वद्वियोगव्यथाभिरशरणमनाथं कृतम् ॥ ४७ ॥

नन्वात्मानं बहु विगणयन्नात्मनैवावलम्बे
तत्कल्याणि त्वमपि नितरां मा गमः कातरत्वम्।
कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण॥ ४८॥

नच मदीयदुर्दशाश्रवणाद्भेतव्यमित्याह

नन्विति। नन्वित्यामन्त्रणे। प्रश्नावधारणानुज्ञानुनयामन्त्रणे नन्वित्यमरः। ननु प्रिये बहु विगणयन् शापान्ते सत्येवमेवं करिष्यामीत्यावर्त्तयन् आत्मानमात्मनैव स्वेनैव। प्रकृत्यादिभ्य उपसंख्यानमिति तृतीया। अवलम्बे धारयामि यथाकथञ्चिज्जीवामीत्यर्थः। तत्तस्मात्कारणात् हे कल्याणि सुभगे त्वत्सौभाग्येनैव जीवामीति भावः। बह्वादिभ्यश्चेति ङीष्। त्वमपि नितरामत्यन्तं कातरत्वं भीरुत्वं मा गमः मा गच्छ। न माङ्योग इत्यडागमाभावः। तादृक्सुखिनोरावयोरीदृशि दुःखे कथं न बिभेमीत्याशङ्क्याह कस्येति। कस्य जनस्यात्यन्तं नियतं सुखम् उपनतं प्राप्तम् एकान्ततो नियमेन दुःखं वा उपनतं किन्तु दशा अवस्था चक्रस्य रथाङ्गस्य नेमिस्तदन्तः। चक्रं रथाङ्गं तस्यान्ते नेमिः स्त्री स्यात्प्रधिः पुमानित्यमरः। तस्याः क्रमेण परि

शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ
मासानन्यान् गमय चतुरो लोचने मीलयित्वा।
पश्चादावां विरहगुणितं तं तमात्माभिलाषं
निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु॥ ४८॥

रधः उपरि च गच्छति प्रवर्त्तते। एवं जन्तोः सुख दुःखे पर्य्यावर्त्तते इत्यर्थः॥ ४८॥

नच निरवधिकमेतद्दुःखमित्याह

शापान्त इति। पाणौ शार्ङ्गं यस्य स तस्मिन् शार्ङ्गपाणौ। सप्तमी विशेषण इत्यादिना बहुव्रीहिः। प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवत इति वक्तव्यात् पाणिशब्दस्योत्तरनिपातः। भुजगः शेषएव शयनं तस्मादुत्थिते सति मे शापन्तः शापावसानम्। अन्यान् अवशिष्टान् चतुरोमासान् मेघदर्शनप्रभृति हरिबोधनदिनान्तमित्यर्थः। दशदिवसाधिक्यन्त्वत्र न विवक्षितमितुग्रक्तमेव। लोचने मीलयित्वा निमील्य गमय धैर्य्येणातिवाहयेत्यर्थः। पश्चादनन्तरं त्वञ्च अहञ्च आवाम्। त्यादादीनि सर्वैर्नित्यमित्येकशेषः। त्यदादीनां मिथोद्वन्द्वे यत्परं तच्छिष्यत इति अस्मदः शेषः। विरहे गुणितमेवं करिष्यामीति मनसावर्त्तितं तं तं वीप्सायां द्विरुक्तिः। आत्मनोरस्मयोरभिलाषं मनोरथं परिणताः शरच्चन्द्रिकाः यासां तासु क्षपासु रात्रिषु

भूयश्चाह त्वमपि शयने कण्ठलग्ना पुरा मे
निद्रां गत्वा किमपि रुदती सस्वनं विप्रबुद्धा।
सान्तर्हासं कथितमसकृत् पृच्छतश्च त्वया मे
दृष्टः स्वप्ने कितव रमयन् कामपि त्वं मयेति ॥५०॥

निर्वेक्ष्यावः भोक्ष्यावहे। विशतेर्लृट्। निर्वेशो भृतिभोगयोरित्यमरः॥ ४६॥

सम्प्रति तस्या मेघवञ्चकत्वशङ्कानिरासायातिगूढमभिधेयमुपदिशति

भूय इति। हे अबले भूयः पुनरप्याह त्वद्भर्त्ता मन्मुखेनेति शेषः मेघवचनमेतत्। किमित्यत आह। पुरा पूर्व्वं पुराशब्दश्चिरातीते। स्यात्प्रबन्धे चिरातीते निकटागामिके पुरेत्यमरः। शयने मे कण्ठलग्नापि त्वम्। गले बद्धस्य कथमपि गमनं न सम्भवेदितिभावः। निद्रां गत्वा किमपि केन वा निमित्तेनेत्यर्थः। सस्वनं सशब्दं रुदती सती विप्रबुद्धा आसीरिति शेषः। असकृत् बहुशः पृच्छतोरोदनहेतुमिति शेषः। मे मम कितव त्वं कामपि रमयन्मया स्वप्ने दृष्टइति त्वया सान्तर्हासं यथातथा कथितञ्च इति त्वद्भर्त्ताभूयश्चाहेति योजना॥ ५०॥

एतस्मादिति। एतस्मात् पूर्व्वोक्तात् अभिज्ञायतेऽनेनेत्यभिज्ञानं लक्षणं तस्य दानात्प्रापणात् मां कुश

एतस्मान्मां कुशलिनमभिज्ञानदानाद्विदित्वा
मा कौलीनाच्चकितनयने मय्यविश्वासिनी भूः।
स्नेहानाहुः किमपि विरहे ध्वंसिनस्ते त्वभोगा-
दिष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति ॥ ५१ ॥

लिनं क्षेमवन्तं विदित्वा ज्ञात्वा हे चकितनयने कुले भवात् कौलीनाल्लोकप्रवादात् एतावता कालेन परासुर्नोचेदागच्छतीति जनप्रवादादित्यर्थः। मयि विषये अविश्वासिनी मरणशङ्किनी माभूः न भव। भवतेर्लुङ् न माङ्योग इत्यड़ागमप्रतिषेधः। ननु दीर्घकालविप्रकर्षात् पूर्वस्नेहनिवृत्तिः शङ्कयेत्याह स्नेहानिति। किमपि किञ्चित् निमित्तं न विद्यत इति शेषः। स्नेहान् प्रीतीः विरहे सत्यन्योन्यविप्रकर्षे सति ध्वंसिनो विनश्वरानाहुः तत्तथा न भवतीत्यभिप्रायः। किन्तु ते स्नेहा अभोगात् विरहे भोगाभावाद्धेतोः। प्रसज्यप्रतिषेधेपि नञ्समासः। इष्टे वस्तुनि विषये उपचितो रसः स्वादो येषु ते उपचितरसाः सन्तः प्रवृद्धतृष्णा इत्यर्थः। रसो गन्धे रसः स्वादे तिक्तादौ विषरागयोरिति विश्वः। प्रेमराशी भवन्ति वियोगासहिष्णुत्वमापद्यन्त इत्यर्थः। स्नेहप्रेम्णोरवस्थाभेदाद्भेदः। तदुक्तम्। आलोकनाभिलाषौ रागस्नेहौ ततः प्रेमा। रतिशृङ्गारौ योगे वियोगतोविप्रलम्भश्चेति। तदेव स्फुटीकृतं रसाकरे। प्रेक्षा दिद्द

आश्वास्यैवं प्रथमविरहोदग्रशोकां सखीं ते
शैलादाशु त्रिनयनवृषोत्खातकूटान्निवृत्तः ।
साभिज्ञानप्रहितकुशलैस्तद्वचोभिर्ममापि
प्रातःकुन्दप्रसवशिथिलं जीवितं धारयेथाः ॥ ५२ ॥

चा रम्येषु तच्चिन्ता त्वभिलाषकः। रागस्तत्सङ्गबुद्धिः स्यात् स्नेहस्तत्प्रवणक्रिया। तद्वियोगासहं प्रेम रतिस्तत्सहवर्त्तनम् शृङ्गारस्तत्समं क्रीडा संयोगः सप्तधा क्रमादिति ॥ ५१ ॥

इत्यं स्वकुशलं सन्दिश्य तत् कुशलसन्देशानयनमिदानीं याचते

आश्वास्येति। प्रथमविरहेणोदग्रशोकां तीव्रदुःखां ते सखीमेवं पूर्व्वोक्तरीत्या आश्वास्य प्रबोध्य त्रिनयनस्य त्र्यम्बकस्य वृषेण वृषभेणोत्खाता अवदारिताः कूटाः शिखराणि यस्य तस्मात्। कूटोऽस्त्री शिखरं शृङ्गमित्यमरः। शैलात् कैलासात् आशु निवृत्तः सन् साभिज्ञानं सलक्षणं यथा तथा प्रहितं प्रेषितं कुशलं येषु तैस्तस्यास्त्वत्सख्या वचोभिर्ममापि प्रातःकुन्दप्रसवमिव शिथिलं दुर्बलं जीवितं धारयेथाः स्थापय। प्रार्थनायां लिङ्॥ ५२ ॥

सम्प्रति मेघस्य प्रार्थनाङ्गीकारं प्रश्नपूर्व्वकं पृच्छति कच्चिदिति। हे सौम्य साधो इदं मे बन्धुकृत्यं बन्धुकार्य्यम्। देवदत्तस्य गुरुकुलमितिवत्प्रयोगः।

कच्चित्सौम्य व्यवसितमिदं बन्धुकृत्यं त्वया मे
प्रत्यादेशान्न खलु भवतो धीरतां कल्पयामि ।
निःशब्दोऽपि प्रदिशसि जलं याचितश्चातकेभ्यः
प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव ॥ ५३ ॥

व्यवसितं कच्चित् करिष्यामीति निश्चितं किम् । कच्चित् कामप्रवेदन इत्यमरः । अभिप्रायज्ञापनं कामप्रवेदनम् । नच ते तूष्णीम्भावादनङ्गीकारं शङ्के यतस्ते स एवोचित इत्याह प्रत्यादेशात् करिष्यामीति प्रतिवचनात् । उक्तिराभाषणं वाक्यमादेशो वचनं वच इति शब्दार्णवे । भवतस्तव धीरतां गम्भीरत्वं न कल्पयामि न समर्थये खलु । तर्हि कथमङ्गीकारज्ञानं तत्राह याचितः सन् निःशब्दोपि निर्गर्जितोऽपि अप्रतिजानानोपीत्यन्वय चातकेभ्यो जलं प्रदिशसि ददासि । युक्तञ्चैतदित्याह हि यस्मात् सतां सत्पुरुषाणां प्रणयिषु याचकेषु विषये ईप्सितार्थक्रियैवापेक्षितार्थसम्पादनमेव प्रत्युक्तं प्रतिवचनं क्रिया केवलमुत्तरमित्यर्थः । नीचोवदति न कुरुते न वदति सज्जनः करोत्येवेति भावः ॥ ५३ ॥

अत्र मल्लिनाथसम्मतः प्रत्यादेशादिति पाठस्तद्व्याख्यानञ्च न समीचीनतया सङ्गच्छते । तस्मादस्माभिः "प्रत्याख्यातुमिति पाठः प्रत्याख्यातुं न करिष्यामीति प्रतिवक्तुं भवतो धीरतां तूष्णीम्भावं न कल्प

एतत् कृत्वा प्रियमनुचितप्रार्थनावर्त्तिनो मे
सौहार्दाद्वा विधुर इति वा मय्यनुक्रोशबुद्ध्या।
इष्टान् देशान् जलद विचर प्रावृषा सम्भृतश्री
र्माभूदेवं क्षणमपि च ते विद्युता विप्रयोगः॥ ५४॥

यामि न समर्थये खलु तवायं तूष्णीम्भावो न प्रत्या
ख्यान सूचक इत्यर्थः" इति व्याख्यानञ्च समधिक
हृद्यतयानुमन्यते।

सम्प्रति स्वापराधसमाधानपूर्व्वकं स्वकार्य्यस्या
वश्यकरणं प्रार्थयमानो मेघं विसृजति

एतदिति। हे जलद सौहार्द्दात्सुहृद्भावात् वा। हृद्भगसिन्ध्वन्ते पूर्वपदस्य चेत्युभयपदवृद्धिः। विधुरो वियुक्तइति हेतोः। विधुरन्तु विश्लेष इत्यमरः। मयि विषये अनुक्रोशबुद्ध्या करुणाबुद्ध्या वा अनुचिता तव अननुरूपा या प्रार्थना प्रियां प्रति सन्देशं मे हरेत्येवंरूपा तत्र वर्त्तिनः निर्बन्धपरस्य मे मम एतत् सन्देशहरणरूपं प्रियं कृत्वा सम्पाद्य प्रावृषावर्षाभिः सम्भृतश्रीरुपचितशोभः सन् इष्टान् स्वाभिलषितान् देशान् विचर यथेष्टदेशेषु विहरेत्यर्थः। देशकालाध्व गन्तव्याः कर्म्मसंज्ञाह्यकर्म्मणामिति वचनात् सकर्म्म कत्वम्। एवं क्षणमपि ते तव विद्युता कलत्रेणेति शेषः विप्रयोगो विरहो माभून्मास्तु। माङित्याशिषि

तत्सन्देशं जलधरवरो दिव्यवाचाचचक्षे
प्राणांस्तस्या जलहितरतो रक्षितुं यक्षवध्वाः ।
प्राप्योदन्तं प्रमुदितमनाः सापि तस्थौ स्वभर्त्तुः
केषां न स्यादवितथफला प्रार्थनाभ्युन्नतेषु ॥ ० ॥
श्रुत्वा वार्त्तां जलदकथितां तां धनेशोऽपि सद्यः
शापस्यान्तं सदयहृदयः संविधायास्तकोपः ।
संयोज्यैतौ विगलितशुचौ दम्पती हृष्टचित्तौ
भोगानिष्टानभिरतसुखं भोजयामास शश्वत् ॥ ० ॥

इति श्रीमहाकवि कालिदासकृतं मेघदूतं
समाप्तम् ।

ष्णम् । सर्व्वत्र व्याप्यते विद्वान् नायकेच्छानुरूपिणी मिति सारस्वतालङ्कारे दर्शनात् काव्यान्ते नायकेच्छानुरूपोऽयमाशीर्व्वादः प्रयुक्त इत्यनुसन्धेयमिति ॥ ५४ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां
मेघसन्देशव्याख्यायां सञ्जीवन्यामुत्तरमेघः समाप्तः ।

—:०:—